# सिंहलविजयम्

## ऐतिहासिकनाटकम्

श्री सुदर्शनपाठी शर्मा

48

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

C-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosh

# सिंहलविजयम्

पुरीसंस्कृतकलाशालाध्यापकेन
साहित्योपाध्यायवेदवेदान्तमीमांसाचार्येण
मञ्जूषाराजपुरोहितेन
श्रीसुदर्शनपाठिशर्मणा
प्रणीतम् ।

भारतराजकुलस्य शिल्पवाणिज्यसचिवानां
तत्रभवतां डाक्टर् श्रीहरेकृष्णमहतावमहोदयानाम्
आनुकूल्येन
ब्रह्मपुरस्थशिरोमणिमुद्रालये
श्रीअनन्ततृपाठिशर्मणा
मुद्रयित्वा प्रकाशितम् ।

प्रथमं संस्करणम्

१९५१

मूल्यं सार्द्धरूप्यकम्

C-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosh

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosh

# निवेदनम्

मत्कृतपादुकाविजयस्याभिनयानन्तरं 'पौराणिकमेवाभिनेतु-मर्हन्ति संस्कृतेन नान्यदित्यभियुक्तैः संस्कृतकलेजच्छात्रै-रनुरुद्धोऽहं सिंहलविजयं व्यरचयम्।

अत्रोत्कलगजपतेः श्रीप्रतुद्द्योतकेशरिणः सिंहलविजयः चोल-राजकन्यापरिणयनं चेत्येतदेवैतिहासिकं वस्त्यवलम्ब्य स्वेच्छया संविधानं संयोज्य मया कथा निबद्धा।

ललितापि प्राकृती भाषा इदानीं विरलप्रचारेत्यत्र परिहृता, गीतचतुष्टयं च उत्कलादिभाषासु सुलभं केवलाक्षरनियममनुसृत्य रचितमिति क्षन्तव्यं महद्भिः।

इदं हि खी १९४२ तमाब्दस्य फेब्रुयेरीमासे उत्कल संस्कृत-परिषत्सभ्यानां सम्माननार्थं संस्कृतकलेजच्छात्रैः श्रीराजगोपाल-मठाधीशानां श्रीगदाधररामानुजदासमहोदयानां संपूर्णं सहायक-त्वं प्राप्य 'पुरी जगन्नाथक्षेत्र' रङ्गमञ्चेऽभिनीतं, सहृदयैः प्रेक्षकैरभिनन्दितं च।

नाटकस्यास्य सफलीभवनाय लेखपरिशोधने परिचालने शिक्षणे सङ्गीतेषु च क्रमेण सांख्याध्यापकपण्डितश्रीकाशीनाथमिश्रा-युर्वेदाध्यापकपण्डितश्रीनरसिंहमहापात्राभ्यां तदानीन्तनच्छात्रा-भ्यां श्रीमद्भागवतपतिसीमाचलसावताभ्यां चात्यन्तमुपकारं प्राप्तोऽस्मीति तेषु सबहुमानं सप्रेम च कृतज्ञतामात्मनः स्वीकरोमि।

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

एवमप्यद्ययावदप्रकाशितमासीदिदम्—इदानीं पुनः सुगृहीतनामभिः श्रीमदुत्कलप्रधानमन्त्रिभिः मान्यवरहरेकृष्णमहताबमहोदयैः ३।१।५० दिने पादुकाविजयस्याभिनयं पश्यद्भिः प्रीत्या सिंहलविजयस्य स्वेन प्रकाशनमुद्घोषयद्भिः वाचकानां गोचरतां प्रापितमिति तान् मान्यवरान् नितरां प्रशंसामि।

अत्रचेदमवश्यं विज्ञापनीयं महद्भ्यः यदस्य कलेजस्य सुयोग्याध्यक्षैः श्रीरामचन्द्रमहापात्रैः एम्.ए.एल.टि.काव्यतीर्थमहोदयैरुत्कलेषु प्रसिद्धनाटकरचयितृभिः स्वस्य साहित्यप्रेम्णा सहजोदारतया च मदन्तरङ्गाभ्यां श्रीकाशीनाथमिश्र श्रीपद्मनाभमिश्राभ्यां सांख्यव्याकरणाध्यापकाभ्यां सह नाटकमिदमामूलचूलं निरीक्ष्यापेक्षितं संशोधनादिकं विधाय प्रकाशनं यावदावश्यकानि कृत्यजातानि निर्वर्त्य च यथेष्टमनुगृहीतोऽहं तेभ्यो महाशयेभ्यो हार्दमभिनन्दनं निवेदयामि।

इदानीन्तनोत्कलमुख्यामात्यान् मान्यवर श्रीनवकृष्णचौधुरीमहोदयान् नाटकस्यास्य मुद्रापणे सानुग्रहं कृतप्रयत्नान् बहुमन्ये।

सम्मानास्पदानां बन्धुवराणा श्रीमनन्तत्रिपाठिशर्ममहाशयानां सहयमिदं प्रकाशितवतामधमर्णोस्मि।

अन्यच्च सहृदयेभ्यः उदारेभ्यः सप्रश्रयमुपस्थाप्य सिंहलविजयं प्रह्वोऽधतिष्ठे इति।

पुरीसंस्कृतमहाविद्यालयात्
ता २९।५१

विदुषां
विधेयस्य
सुदर्शनपाठिशर्मणः

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha



**The Hon'ble Dr. Harekrishna Mahatab D. Litt.**

**Minister of Commerce and Industry,**

**Government of India.**

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

# उत्सर्गपत्रम्

श्रीमतां मान्यवराणां भारतयुक्तराष्ट्रस्य शिल्पवाणिज्य-
मन्त्रिणां श्रीहरेकृष्णमहतबमहोदयानां परिसरेषु

श्रीमन्तो महोदयाः!

अत्रभवतां संस्कृतानुरागं तत्र तत्रोपलभ्य संस्कृतज्ञा नितरामानन्दिता दृश्यन्ते। पुरीसंस्कृतकलेजाध्यापकाश्छात्राश्च भवद्भिः परतन्त्रीकृता इत्यत्रभवतां राजनीतिषु धुरन्धराणामुत्कलश्रेष्ठानां साहित्येतिहासयोः समं समर्थयोः करकमलयोरर्प्यते ऐतिहासिकनाटकं "सिंहलविजय"मिति अनुरक्तेषु पक्षपातेन स्वीकर्तुमर्हन्तीदं श्रीमन्तो भवन्त-इति।

पुरी, सविनयमावेदकः,

ता.१।९।१९५१. श्रीसुदर्शनपाठिशर्मा

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

# OPINION

I have gone through the three Sanskrit dramas viz Padukavijaya, Simhalavijaya and Satyacharita, composed by Pandit Sudarsan Pathi Veda-Vedanta-Mimansacharya Sahityopadhyaya, teacher of Vaisnana Darsan and Meemansa of the Puri Sanskrit Callege. The dramas have been written in simple Sanskrit so that a person who has passed the Matriculation examination with Sanskrit as one of his subjects, can easily understand the subject matter. Large compounds aud difficult words are not to be seen anywhere. But at the same time the dramas abound in elegant ideas and good thought. The tune of the songs therein has been modernised. Thus there is a great departure from the difficult classical Sanskrit dramas. In firm, the dramas have been fully adopted to the modern age. The intention of the author in writing such dramas is to create interest and love for Sanskrit literature and there-by he has paved the way for the spread of Sanskrit learning and culture. The three dramas were successfully dramatised at Puri by the students of

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

the Puri Sanskrit College in the years 1944, 1945 and 1946 respectively and were much appriciated by the audience consisting mostly of educated public. In the Padukavijaya the author has shown greater oniginality in moulding the character of Kaikeyi whose pathos can greatly affect the audience, Simhalavijaya is a heroic drama where as Satyacharita is a love drama. Finally I wish all success to our new dramatist.

PURI,
25-3-46

(Sd) D. D Das
Principal
PURI SANSKRIT COLLEGE

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

# अभिमतम्.

उन्मादकारी चित्तरञ्जको रसः काव्यात्मभूतत्वेन प्रधानतमं वस्तु। अभिनयपरिपाट्या तस्याभिव्यक्तिरनुभूतिश्च सम्यग् भवतीति श्राव्यकाव्यतोऽभिनयप्रधानस्य रूपकस्य प्राधान्यमस्ति। अतएव "काव्येषु नाटकं रम्यम्" इत्यभियुक्ताः संगिरन्ते। काव्यराज्ये नाटकस्य स्थानमुन्नततमम्, प्रतिष्ठा च गरिष्ठा। काव्यं पाठकस्यैव, नाटकं तु पाठकस्य दर्शकस्य च सम्पत्तिः। दर्शकेषु शिक्षिता अर्द्धशिक्षिता अशिक्षिताश्च विद्यन्ते। नाटकं यथा तादृशं जनसमूहानानन्दयति न तथा शास्त्रान्तरम्। दृश्यकाव्यतः पाठकानां दर्शकानां च न केवलं चित्तविनोदः किन्तु व्यावहारिकज्ञानं चरित्रवत्ता जातीयताया उद्बोधनं च बहुशः सम्भवति। दर्शकेषु पाठकेषु एतान् गुणाननुत्पाटयन्नाटकमनाटकमेवेति नाटकरचना नातीवसुकरा। अतः नाटकान्तं कवित्वमिति वदन्ति। नाटककारः साहित्यपीठेऽग्रपूज्यः। पाश्चात्येषु सेक्सपियर् पौरस्त्येषु कालिदासश्च महामानवौ कविकुलगुरुपदवीमवाप्यामरौ चिरपूज्यौ च भवतः। नाटकीयायाः कलायाः

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

शैल्याश्च स्वतन्त्रता काव्यराज्ये समाद्रियते । आहार्य्यं सात्त्विका-द्यभिनयेन संगीतनृत्यादिसंयोगेन अतिसरसया हृदयग्राहिण्या विविधोक्त्या च रसः सम्प्लवन् दर्शकान् रसाप्लुतान् करोति । अधुना विद्युदुद्भासिता रङ्गभूमिर्नाटकमतिसरसं प्राणवच्च करोति । ब्रह्मानन्दमास्वादयन्तः समाधिस्था योगिन इव दर्शका अभिनयपरिपाट्या विमुग्धा वित्तेतरवृत्तयश्च ब्रह्मानन्दसहोदरं रसमास्वादयन्ति ।

कला रुच्यनुवर्तिनी । रुचिश्च कलानुवर्तिनी । कालश्च गतिशीलः । अतः साहित्यकला कालं रुचिं चानुसृत्य जायमाना सर्वदा नैकरूपा भवितुमर्हति । पुनश्च साहित्येन सह जीवनस्य सम्बन्धो विच्छेद्यः । शिक्षासभ्यतासंस्कृतीनां परिवर्त्तनेन सहैव साहित्यप्रकाशरीतौ परिवर्त्तनमवश्यम्भावि । प्राचीनतायां आधुनिकतायाश्च संघर्षे प्राचीनमतमाधुनिकतां वृणोति । तदभिनन्दनेनात्मानं संवर्द्धयति च । दृष्टान्तोऽस्य सर्वत्र प्रत्यक्षीक्रियते ।

बहुभाषाजनन्याः सर्वजनवन्दनीयायाः संस्कृतभाषायाः प्रतिष्ठा कालस्य कुटिलगत्या मलिना । तथापि तस्या हृत्पिण्डमिदानीमपि रुक्मिणि विराजते विराजिष्यते च । तच्च महतो महिमा अविनाशीति प्रमाणीकरोति । कालिदासभवभूत्यादीनां महत्त्वं कालेनापि सर्वभक्षकेण ह्रासयितुमशक्यम् । भाषागतपर-

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

म.र पि सुसम्बद्धेयं जननीरूपिणी संस्कृतभाषास्माकं चिर-वन्द्या। तस्या अवमानना शिक्षासभ्यतासंस्कृत्यादीनामस्मदीयाना-मवमाननेति सुनिश्चितमेव। प्राच्यानां सर्वविधवैशिष्ट्यं संस्कृ-तभाषानिबद्धम्। यथार्थरुच्यनुकूलानां संस्कृतनाटकादिसकल-शास्त्राणां विरचनं संस्कृतभाषायामाग्रहं जनयदेव पूर्वजानां वैशिष्ट्यबोधनेऽनुकूलं भवेत्। अन्यथा मौलिकतया सहास्माकं वैशिष्ट्यं महत्त्वं च अनवबुध्यमानं सत् क्रमशो विलयं यास्य-तीति सर्वथाधुनातनरुच्यनुकूलानां समयोपयोगिनां संस्कृत-पुस्तकानां विरचनं साग्रहमाशास्यते।

पुरीसंस्कृतमहाविद्यालयस्य वैष्णवदर्शनमीमांसाध्यापकेन श्रीसुदर्शनपाठिशर्मणा विरचितानि रुच्यनुकूलानि समयोपयो-गीनि संस्कृतनाटकानि न केवलं तस्य रचनापाटवं प्रकाश-यन्ति, किंतु संस्कृतभाषागौरवमपि वितन्वन्ति। दार्शनिक-लेखनीप्रसूतान्यपीमानि सरसानि; अतोऽहं पाठिशर्माणमभिनन्द-यामि। पाठिमहोदयविरचितसिंहलविजय-करुणापारिजात-सत्या-चरित पादुकाविजयनामधेयनाटकचतुष्टयात् करुणापारिजातस्य पादुकाविजयस्य चाभिनयदर्शनेन विमुग्धोऽहमभवम्। अन्यानि चास्य नाटकानि समाकर्ण्य नितरां परितोषं लब्धवान्। एषु नाट-केषु रचनायाः सरलता सरसतां च, आधुनिककलासौष्ठवम्

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

दृश्यसंयोजनम् , कल्पनाचातुरी , नृत्यगीतसमावेशश्च अतीव-रमणीयतामापादयन्ति। विशेषतः कवेः श्लोकसङ्गीतरचनायां प्रतिभा स्वीकरणीया श्लाघ्या च। विद्युदालोकोद्भासिते रङ्ग-मञ्चे अभिनीतानीमानि नाटकानि अतीवमनोमोहकराण्यभवन्। दर्शका अभिनयदर्शनेन न केवलं विमुग्धाः प्रशंसन्ति , परन्तु संस्कृतभाषायामेवंविधान्यभिनयोपयोगीनि नाटकानि सम्भव-न्तीति विस्मयं प्रकाशयन्ति। संस्कृतभाषायाः सार्वजनीनत्वं कीर्त्तयन्ति च। तैः प्रकाशिता प्रशस्तिः कवेर्यथार्थपुरस्कारः।

पतेषु नाटकेषु आधुनिकता वस्तूपयोगिनी भाषा च सुरक्षिता। नान्दीवचनं सूत्रधारनटादीनां प्रवेशनं प्राकृतभाषा-वर्जनं च नाटककारेण स्वेच्छयैव कृतम्। परितापस्य कारणं यदिदानीं यावदिमानि नाटककारस्य पेटिकायां पतितानि। सौभाग्यत उत्कलप्रदेशस्य भूतपूर्वप्रधानामात्यानामिदानीं भारत-राष्ट्रस्य नियन्त्रणे शिल्पे तथा वस्तुविभागे विनियुक्तानां स्वनामधन्यानां श्रीहरेकृष्णमहताबमहोदयानामानुकूल्येन एत-न्नाटकं प्रकाशं याति। तेषां संस्कृतभाषां प्रति ईदृशः समा-दरः आदर्शस्थानमभिनन्दनीयश्च। नाटककारेण सह वयं तेभ्यः कृतज्ञतामर्पयाम इति शम्।

अस्य नाटकस्य नायक उत्कलराज उद्योतकेशरी सिंह-लान् विजित्य सुमहद् यशः सम्पादयामासेति इतिहासप्रसिद्धम्

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

तामेव कथामाश्रित्य विरचितमिदं नाटकम्! उत्कलसेनापत्या विचित्रायाः सिंहलसेनापत्याः दीर्घवेण्याश्च समरनैपुण्यं चोलराजकुमार्याः प्रगाढं पाण्डित्यं च तदानीन्तनीनां नारीणां शिक्षासम्पदं सूचयत् दर्शकानां श्रोतृजनानां च हृदयमानन्दयति। अन्येषां पात्राणां यथाचारवाग्व्यवहारविनिवेशोऽपि पेशलतां संवर्द्धयति।

सरसा सरला ललिता चाभिनयुक्ता भाषा प्रथितयशसामपि कवीनां स्मारयति। नाटकेषु श्लोकानां बहुव्यवहारो रसबोधपरिपन्थितया हृदयग्राही न भवतीति अत्र अल्पीयांस एव श्लोका उपन्यस्ताः। ते च पदविन्यासमहिम्ना श्रोत्रसुखमप्यापादयन्तो नितरामानन्दयन्ति।

चित्रास्वात्योर्मध्यगता शशिरेखेव शोभना!
मार्जयत्यन्तरात्मानं स्निग्धस्मेरविलोकनैः।

इत्यनेन सखीद्वयमध्यगतां कलावतीं वर्णयन् राजा तां श्रोतृजनस्य सम्मुखे स्थापयन्निव प्रतीयते।

अन्यानुपेक्षमाणा हि सिंहलाः सिंहविक्रमाः।
स्वभुजैः शात्रवं जित्वा भुञ्जते हि वसुन्धराम्।

इत्युक्त्या स्वकीयं विक्रमं वर्णयन्ती दीर्घवेणी श्रोतृजनान् श्रवणमात्रेणैव अधिगतार्थान् करोतीत्यादयः।

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

स्वदेशगौरवरक्षार्थमुत्कलीयानां प्राणव्ययेनापि प्रयत्नो विजितेषु च सम्यगुदारव्यवहारश्च एतन्नाटके प्रदर्शितः।

अन्ये च तात्कालिका व्यवहारविशेषाः प्रतिपादिताः सन्ति।

पुरी, श्रीरामचन्द्रमहापात्रः

ता.२५।८।५१. सदाशिवसंस्कृतकलेजाध्यक्षः

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

# कुशीलवाः

पुरुषाः—

१. श्रीमदुद्योतः... ... ...उत्कलराजः
२.पुष्कराक्षः... ... ... सेनापतिः
३.सिद्धवटुः... ... विदूषकः
४.शिष्यः... ... .. कापालिकस्य शिष्यः
५.चित्रकेयूरः... ... सिंहलराजः
६.शार्दूलाक्षः... ... ... सिंहलसेनापतिः
७.माधववर्मा... ... ... चोलराजः
८.मन्त्री... ... ...चोलस्य मन्त्री
९.नरसिंहः... ... ... औत्कल युवकः

सन्यासी कापालिकः उत्कलदूतः दस्युपतिः चोलदूतः सिंहलदूतः नागरिकः गोदावरीखण्डशासकः गोपालः सैनिकाः भूतगणा दस्यवः द्वारी—इत्यादयः।

स्त्रियः—

१.कलावती... ... चोलराजकुमारी
२.तरला... ... ... " सहचरी
३.दीर्घवेणी... ... सिंहलराजकन्या
४.विचित्रा... ... ... उत्कलसेनानेत्री
५.माल्यप्रिया... ... .. पुष्पविक्रेत्री
६.पद्मा... ... ... मुक्ताविक्रेत्री
७.पृथुका... ... ... "सहचरी

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

# प्रारम्भिक सङ्गीतम्

विश्वविजयिनि कलिङ्गजननि चरणमभयमाश्रये ।
न सुरसम्पदं न वा सिद्धपदं न मुदमपरां कामये ॥
सुरभिकुसुमसुरसफलिनी बहुविधशस्यसम्पत्तिशालिनी
तुङ्गगिरिमहातटिनीमालिनी जननी भवति शान्तये ॥
पुण्यस्थलवती पतितपावनी दारुमयब्रह्मयुता सनातनी ।
त्रिदिववासिभिरपि परममिवन्दिता सेविता मुक्तये ॥
चिरसाहसिकवीरप्रसविनी स्थिरयशोराशिवरपताकिनी ।
कलाविदञ्चिता शास्त्रमुखरिता कल्पतामस्माकं स्वस्तये ॥

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

# सिंहलविजयम्

## प्रथमाङ्कः

### प्रथमदृश्यम् ।

राजपथः—

[तूर्यध्वनिः - प्रविशन्ति विजयपताकाधारी सैनिकः ; गोदावरीखण्डशासकः वन्दिः ; तस्य पार्श्वयोः मुक्तखड्गहस्तं सैनिकद्वयम् ; पश्चादेकः सैनिकः । सर्वे यथार्हं परिक्रम्य गताः । ]

पट उत्क्षिप्तः

[सुसज्जिता शिविरकक्षा--मुख्यासने द्वे, पार्श्वतः द्वित्राणि ; सोत्साहमुपविष्टः पुष्कराक्षः । द्वारे प्रहरी तिष्ठति । ]

[नेपथ्ये तूर्यध्वनिः]

पुष्कराक्षः---(उत्थाय)समागता सौभाग्यवती विचित्रा। (सानन्दमग्रेसरो भवति। प्रविशति सद्यः अश्वादवरुह्य विचित्रा। विचित्रा पुष्कराक्षस्य पादयोः शिरसा वन्दते)

पुष्कराक्षः-( तां मणिबन्धे गृहीत्वा उत्थाप्य ) आयुष्मति ! सौभाग्यवती भव। परं प्रशंसिता वयं भवत्याः शौर्य्येण ।

विचित्रा-(सलज्जं नमति )

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

पुष्कराक्षः सत्यं हरिचन्दनस्य दुर्गं स्मृत्वा कम्पितमिवास्माकंहृदयम्

विचित्रा--यथा दुर्गं भवतु आर्य --उत्कलकेशरिष्वपि द्रोहवता-
मेवमेव परिणामो भवेत् ।

पुष्कराक्षः-(सोल्लासम्)श्लाघ्यं सेनापरिचालिकायाः कौशलम् !

विचित्रा--नह्यं वं महाभाग नेयं नितान्तं बालिका—

पुष्कराक्षः—नियतमियं बालिका वत्सरदशकाद् दृष्टा नवनीत-
कोमला कृशाङ्गी परन्तु इयमिदानीं गोदावरीखण्डस्य
शासनकर्त्तारं दुराधर्षं रामकृष्णहरिचन्दनमपि युद्धेन
वन्दीकृत्य समानयन्ती सेना-नियन्त्री !

विचित्रा-- (सलज्जम्) किं वात्र कौशलम् ? यद् भवान्
प्रशंसितुमिच्छतु , स्वयमत्र-भवान् श्रीपुष्कराक्षः ?

पुष्कराक्ष (सस्मितम्)वृद्धा वयंम्-वयोगुणेन एव किञ्चिज्जानीमः

विचित्रा—नम्र हसति )

पुष्कराक्षः—(सस्मितम् कथमत्र हासस्य अवकाशः ?

विचित्रा—(हसन्त्येव) अत्रभवतामकालवृद्धत्वेन ।

पुष्कराक्षः--कथं नैवम् ? द्वादशभिः वत्सरैरधिकोऽस्मि भवत्याः ।

[प्रविशति सैनिकः]

सैनिकः—(अभिवाद्य) वन्दिः समानीतः ।

पुष्कराक्षः--प्रवेशय ।

[सैनिकः अभिवाद्य गतः ।]

पुष्कराक्ष-हरिचन्दनस्यापि एवं मतिभ्रमः केन वा सम्भावितः ?

विचित्रा—कतिपयसैन्यसाहाय्यसम्भावनया महत्सु केशरिष्वपि
अस्य अप्रत्ययो जातः ।

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

[प्रविशन्ति वन्दिमादाय सैनिकाः]

पुष्कराक्षः—एषोऽयं हरिचन्दनः। उपविशतु भवान्। (सङ्केतेन आसनं- निर्दिशति।)

हरिचन्दनः— किमासनेन ? विचारकस्य पुरतो वन्दीनाम् अवस्थानमेव उचितम्।

पुष्कराक्षः—न पुनर्युष्मद्विधा उत्कलसामन्ताश्चिरं वन्दयः। (उत्थाय) एषोऽहं स्वहस्तेनैव मोचयामि भवन्तम्। (तदन्तिकमायाति, सैनिकाः शस्त्राणि संहरन्ति, अयं शृङ्खलां मोचयति) इदानीमुपविश्य यथार्हमनुष्ठातुमर्हति भवान्। (तस्मै आसनमेकं निर्दिश्य स्वासने उपविशति)

हरिचन्दनः—नह्येवं पुष्कराक्ष, न हरिचन्दनः पुष्कराक्षादपि एवंविधमपमानं काङ्क्षति।

विचित्रा—(तं साश्चर्यं पश्यन्ती) किमेवम् ?

हरिचन्दनः—किं वात्र भवत्या आश्चर्यकारणम् ? विधातृविलसितमपि स्वकृत्यम्मन्यमाना त्वं सम्मानार्हमपि यथेष्टमवमन्यसे।

पुष्कराक्षः—(क्रुद्धोऽपि धैर्यमवलम्ब्य) कथमिदानीमपि हरिचन्दन ! भ्रान्तो भवान् ? कुतो वा सर्वत्र स्वस्यापमानं शङ्कसे?

हरिचन्दनः—स्वस्य अपमानं शङ्के ? ओः तिष्ठतु तावत् भवतामौदार्याभिनयः। न रामकृष्णः युष्मद्विधानामपि कृपाकाङ्क्षी भवेत्।

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

पुष्कराक्षः—कथमत्रापि भ्रमः ? कथं विश्वस्तेष्वपि अविश्वासारोपः ? जानास्येव पुष्कराक्षः न मिथ्या व्याहरेत् ।

हरिचन्दनः—कोऽत्र तवाभिप्रायः ?

पुष्कराक्षः—( स्मित्वा ) ममाभिप्रायः—ममाभिप्राय इदानीं सम्राजि अनुरज्यन्तं भवन्तं पुनरेव सामन्तपदवीमध्यारोप्य संमाननाय ।

हरिचन्दनः—( अपहस्य ) ब्राह्मण ! न पुनः क्षत्रिया भिक्षोपजीविनो भवन्ति ।

विचित्रा—( सविस्मयकोपमेनं निरीक्ष्य ) किं राजनि दोहः क्षत्रियत्वम् ?

हरिचन्दनः—वीराणां भागधेयेषु यतनं न द्रोहः । न पुनर्दैवान्निर्जित्य त्वं गर्वमुद्वह ।

पुष्कराक्षः—( कुपितः ) न पुनः कार्यमारभमाणो भवानस्मरद् दैवम्—न वा भागधेयेषु यतनं याथार्थ्येन निरूपितं भवता ।

हरिचन्दनः—ओः, किमुत्तरोत्तरेण ? न तृणायापि मन्यते युष्मद्विधान् हरिचन्दनः ।

पुष्कराक्षः—( कुपितोऽपि सोपहासम् ) एवं न मन्यतां नाम । परन्तु महत्सु केशरिषु न भवान् नम्रो भवेत् ?

हरिचन्दनः—हाः हाः हाः !! नम्रः -केशरिषु!हरिचन्दनः'इहैव जन्मनि ! हाः हाः हाः !

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

विचित्रा—ओः, अत्यन्तमसह्यः। (खड्गं स्पृशति)

हरिचन्दनः—धिक् धिक् ते खड्गम्।

पुष्कराक्षः—किमेवं रामकृष्ण! कथमेवमधिक्षेपः! जानास्येव महान्तम् उत्कलकेशरिणम्?

हरिचन्दनः—धिक् किमनेन? को वैनं गणयेत्?

पुष्कराक्ष—(कुपितः) एष न भवसि अनात्मज्ञ। (सैनिकान्) भटा बन्दीकुरुत वाचाटम्। (सैनिकास्तं बन्दिं कृत्वा पुन खड्गानुद्यतान् कुर्वन्ति।)

पुष्कराक्षः—नयत, पशुमिव बद्ध्वा चोलं यावत् प्रापयत।

[सैनिका यथार्हं बन्दिमादाय गताः।]

पुष्कराक्ष.—सर्वो हि स्वकरणीयस्य फलं लभेत।

विचित्रा—नाद्यापि विधातास्य प्रसन्नः।

[प्रविशति सैनिकः]

सैनिकः—(अभिवाद्य) इयमत्र महाराजानामाज्ञापत्रिका।

(समर्पयति)

पुष्कराक्षः—(सबहुमानं गृहीत्वा उद्घाट्य पठति।) भद्र विश्राम्यतु भवान्।

[सैनिकः अभिवाद्य गतः।)

पुष्कराक्षः—भवति नाद्यापि दक्षिणापथेषु सम्यग् विनीताः केचित्। कतिचित् पुनः गूढं वैरमाचरन्तो दृश्यन्ते। अत्र तावत् प्रभवतामेष आदेशः—सिंहलविजयसुकरत्वाय समग्रा दक्षिणापथा आयत्ताः कर्तव्याः।

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

विचित्रा—सिंहलयुद्धार्थमेव पर्य्याप्ता सेना अत्र आनीता भवेत् ।

पुष्कराक्षः—एवमिदम् । अहमस्मादेव स्थानात् उत्कलान् यामि । सुमहदस्माकं कर्तव्यमिदं दक्षिणापथशासनम् ।

विचित्रा—कथं भवानेव गन्तुमिच्छतु ? सिंहलविजयः कथं सम्पद्येत ?

पुष्कराक्षः—सिंहलविजयादपि कठोरं मार्गशोधनं मन्ये । अपि तु अस्त्येव विचित्रा सिंहलेषु सेनानियन्त्री ।

विचित्रा—नह्येवं वीर, कथमियं शक्नुयात् ?

पुष्कराक्षः—कथम् ? उत्कलवाहिनीपतिसुतायाः सिंहलविजयेऽपि असामर्थ्यं शङ्क्येत ? [ तद्धस्तं गृहीत्वा ] एवमेव विचित्रे, भवत्यामेव अयं भारो निहितः । अवश्यं भवती सिंहलविजये सेनापतिर्भविता ।

विचित्रा—कथमेवम् आर्य— (इत्यर्द्धोक्ते)

पुष्कराक्षः—नात्र किञ्चिद् वक्तव्यं त्वया । इदानीं चोलं निकषा स्यात् महाराजः । शीघ्रं त्वं तमुपतिष्ठस्व । अद्यैव आवां यथार्हं यावः ।

विचित्रा—यथावा आदेशोऽत्रभवताम् । (अञ्जलिं बध्नाति ]

पुष्कराक्षः—[उत्तिष्ठते ; तमनु विचित्रा ] भवत्या विज्ञापनीयाः प्रभवन्तः-कृष्णायाः सेतुबन्धं यावत् विनेता पुष्कराक्ष सिंहलानेव अचिराज्जेतुमर्हन्ति प्रभवन्तः । यावः ।

[गन्तुमारब्धौ । ]

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

प्रथमोऽङ्कः ; द्वितीयं दृश्यम् ।

स्थानं—काबेरीतीरम्

[काबेर्याः स्रोतसि नौकायां कलावती तरला च ]

(कलावती गायति)

चल रे चल मम तरणि
काबेरीवारिणि तरङ्गिणि ॥०॥
चल रे लोलं प्रतिकल्लोलं
लालयतादसमं तव तटिनी
शीलय लीलां रोधसि चटुलां
खेलतु रे नितरां नलिनवनी ।१।
मन्दं वहता चन्दनमरुता
शुध्यतु ते परितः सुखसरणी
तव शुभमङ्कं मधुरमनङ्कं
वाञ्छतु भोगवती सुरतरुणी ।२।

[नौकायाः समीपे एकः कुम्भीरः जलादुत्थितः, तरला नलिकास्त्रेण तं विनाशितवती, गुलिकाभावमभिनयति। पुनर्निकषा नावमुत्थितो नक्रः। अव्यवधानं दूरादागतेन शरेण मज्जितः, मृतः। नौका क्रमेण तीरमुखी आगच्छति। प्रविशति विचित्रा। कलावतीतरले नावः अवारुह्य तीरमागते। कलावती विचित्रामालिङ्गति। सर्वा आगच्छन्ति।]

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

कलावती—( विचित्रां प्रति ) प्रियसखि ! पुनः कथयामि अबला अपि प्रभावोज्वला उत्कलेषु ।

विचित्रा—भर्तृदारिके !—

कलावती—न ह्येवं प्रियसखि ! शपितासि न पुनरेवम् अथवा कलिङ्गवीरायाः सखित्वे अनर्हा एव कलावती ।

विचित्रा—मा मा एवं प्रियसखि ! वीराणां मूर्द्धानः खलु चोलाङ्गनाः । अत्यन्तं प्रियापि मे भर्तृदारिकैव भवती, न चोलोत्कलानामनैक्यम् ।

तरला—द्वौ पुरुषौ इत आगच्छतः । उत्कलीयौ भवेताम् ।

कलावती—अहो ! क एषः अनयोः-

Description of नृपति

तेजसा तपनं जित्वा कान्त्या मकरकेतनम् ।
दैवादभिमुखो भाति लीलाधिक्कृतदिग्गजः ॥

विचित्रा—प्रियसखि ! स एष महानुत्कलकेशरी श्रीमदुद्द्योतः

कलावती—दिष्ट्या प्रियसखि !

( ततः प्रविशतः राजा सिद्धचटुश्च )

राजा—भो वयस्य ! नूनं निरधारयम् एषा अत्रभवती कलावती ।

कलावती—( स्वगतम् ) प्रेक्षणीया अस्य सर्वातिशायिनी श्रीः ।

( अवलोकयति )

तरला—( जनान्तिकम् ) भर्तृदारिके ! न पुनरिमां तदानीं तथा वदिष्यसि ?

कलावती—(तथा) किमेवं तरले ! ( तरला जल्पः हसति )

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

राजा—वयस्य ! इयं हि-

चित्रास्वात्योर्मध्यगता शशिरेखेव शोभना
मार्जयत्यन्तरात्मानं स्निग्धस्मेरविलोकनैः ॥

विचित्रा—( उपसृत्य ) जयतु जयतु महाराजः । ( कलावती सविनयं नमस्करोति तरला च )

राजा—( कलावतीं प्रतिनमस्कृत्य ) विचित्रे ! दृष्टं नैपुण्यं तव । का पुनरेषा लोकदीपिका दीपशिखा ?

विचित्रा—देव ! कांवा अन्यां श्रीमदुद्द्योतपादा एवमपि प्रशंसेयुः । सैवेयं त्रिलोकलोचनचन्द्रिका कलावती ।

राजा—दिष्ट्या क्षेमवती राजनन्दिनी । महाभागे क्षमणीयो भवत्या मम अपरिकलनकृतोऽयमपचारः ।

कलावती—राजन् ! कोऽत्र श्रीमतामपचारशङ्कावकाशः ? प्रत्युत भागधेयोपनीतेन भवद्दर्शनेन कृतार्थीकृता चोलेन्द्रनन्दिनी ।

राजा—एवम् , चोलेन्द्रनन्दिनि ! भागधेयपरिपाकादेव भवादृशीनां दर्शनावसरो लभ्यते ।

कलावती—अपि श्रीमतां महतां सिंहलजिगीषा एकान्त न संहरणीया ?

राजा—अपि भवति ! अत्र किञ्चित् संहरणीयस्य बीजं पश्यति ?

कलावती—सहनीया पुनः पुरोभागिता । अनावश्यकता एव अत्र बीजम् ।

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

राजा—कथं महारथस्य विजिगीषा न शोभते ? कथं वा क्षत्रस्य शस्त्रग्रहणं निष्फलम् ?

कलावती—स्वरक्षणाय स्वाश्रितरक्षणाय च वीरस्य शस्त्रधारणम्

राजा—न दिग्विजयाय ?

कलावती—अथ किम् ।

राजा—न ह्येवं चोलेन्द्रनन्दिनि ! वीरस्य विजिगीषा हि स्वभावः । अपि च-

[नेपथ्ये सन्यासिगीतं "वन्दे ब्रह्म" इति]

( सन्यासी गायन् प्रविशति )

वन्दे ब्रह्म सनातनम् ॐ
त्रिजगति सूर्जितशासनम् ॐ
स्वाश्रितभवभयनाशनम् ॐ
अव्ययमजरं शान्ताकारं
भासितदिङ्मुखभासनम् ॐ
अतुलानन्दं त्रिभुवनकन्दं
सत्यचितं सुखपावनम् ॐ ॥

( सर्वे उपसृत्य नमस्कुर्वन्ति । )

सन्यासी—सर्वे अभिमतानि लभन्ताम् । अपि क्षेमवन्तौ कलावती श्रीमदुद्योतौ ?

राजा कलावती च—कथमावां विदितौ भगवता ?

सन्यासी—वत्सौ ? अस्मद्विधानां यथेष्टचराणां को वा न परिचितः ? परन्तु वत्सौ, भारते सिंहले चीनादिषु च को

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

वा युवां द्रष्टुं न अभिलषेत् ? आयुष्मति ! प्रत्यासन्ना व्रतसमाप्तिर्भवत्याः । श्रीमदुद्द्योत ! तवापि अवश्यं भवेदभियानफलम् ।

[ वन्दे ब्रह्म इति गीतं गायन् प्रस्थितः । ]

राजा—एष्टव्या एव एवंविधानां व्रतस्य शुभाः परिणतयः ।

तरला—श्रीमतां महतां च अभियानफलानि-

सिद्धवटुः—उभयथा अपि बहुषु आतैव तात्पर्यम् । ( इति भोजनमभिनयति । सर्वे स्मयन्ते) ।

तरला—भर्तृदारिके ! सायमतिवर्तते ।

कलावती—महाराज ! स्मर्तव्योऽयं जनः अवसरेषु ।

राजा—कथम् अत्रभवत्यामपि विस्मरणं सम्भवेत् ?

कलावती—(विचित्राम्) प्रियसखि ! अनुमानय महाराजम् । महाभाग ! सर्वा अपि अस्मान् अद्यानुमन्यस्व ।

राजा—क्षमस्व कुमारि ! अद्यास्माकं किमपि अवश्यं मन्त्रणीयमस्ति । श्वो विचित्रा भवतीमुपतिष्ठेत ।

कलावती—( विचित्रामालिङ्ग्य ) प्रियसखि ! धारयामि उत्कण्ठां यावद्दर्शनम् । न पुनः अनेनाभ्यास्ति हृदयात्-

विचित्रा—प्रियसखि । महान्तो हि अभीष्टतममपि सानुनयं यच्छन्ति इति किमत्र चित्रम् । सर्वथा आज्ञाकरी ते विचित्रा ।

[ कलावती कथंचित् तामुन्मुच्य राजानं नमस्कृत्य ससखी प्रस्थिता । ]

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

सिद्ध— भो वयस्य ! तत्त्वं ते उद्घाटयामि । सर्वतः कलावती तन्नभवती कलावती ।

विचित्रा— किमुच्यते, प्राच्येषु अन्येषु च पुख्यातरूपगुणा चोलेन्द्रनन्दिनी ।

राजा— सत्यम्—पूर्वं श्रुत्वैव यां गाथाम्
अमन्ये ह्यतिरञ्जिताम्
तामेवाति लघुं मन्ये
दृष्ट्वा चोलेन्द्रनन्दिनीम् ॥

(नेपथ्ये-देवारात्रिकघण्टाध्वनिः)

सिद्ध— भो वयस्य ! प्रवर्तिता भगवतः आरात्रिका, गच्छामः

राजा— एवं वयस्य ! आगच्छ विचित्रे !

(सर्वे प्रस्थिताः)

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

## सिंहलविजयम्

### तृतीय दृश्यम् ।

स्थानम् राजपथः ।

(प्रविशति कापालिकः)

(दिगन्तरं निरीक्ष्य) एषा आयाता, अनया मुखेन अनुकूलयितव्या सिंहलेन्द्रनन्दिनी । सा चेत् भक्तिमती मयि भवेत् अप्रतिहतो वर्ते सिंहलेषु ।

(ततः प्रविशति सज्जितानां पुष्पाणां विक्रेत्री माल्यप्रिया)

कापालिकः- अये माल्यप्रिये ! कानि वा सुरभीणि मनोहारीणि च ते पुष्पेषु ? (माल्यप्रिया न किञ्चिदपि उक्त्वा चलति)

कापालिकः- किम् ओदनभाण्डः त्वया चूल्यां समारोपितः ? येन एवं भाण्डमुखी अपयासि ।

माल्यप्रिया— त्वमेव भाण्डमुखः, त्वमेव भण्डः, त्वमेव निरायुः- न मां अतः परं तथा वद ।

कापालिकः— किमेवं सुन्दरि ! किं वा अहमवदम् ?

माल्यप्रियाः- किं पुनर्वदेः ? किं वा नावदः ? तवैव भिक्षुकी भाण्ड-

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

मुखी भवतु, कुण्डमुखी भवतु अन्यदपि भवतु । काहं तव ?

कापालिकः- त्वम् अत्यन्तं मम प्रियासि । को वा अस्माकं त्वया विरोधः । एकदा मम प्रभावं त्वां दर्शये । परन्तु उचितेनैव मूल्येन सर्वाण्यपि कुसुमानि दातुमर्हसि ।

माल्यप्रिया—धिगस्तु रे निर्लज्ज ! धिक् त्वाम्- अहमत्र श्रीमत्यै राजनन्दिन्यै पुष्पाणि उपहारामि । अयं पुनर्भण्डः तेषामपि पुष्पाणां मूल्यं दास्यति ! याहि दूरमपसर – हुँ !

कापालिकः— अये ! राजकन्या अपि एभिः मामेव पूजयिष्यति ।

माल्यप्रिया-धिगस्तु रे धिगस्तु, अस्माकं भर्तृदारिका प्रत्यहं नवपुष्पभूषिता राजसभां प्रविशति । इदानीमेव सा पितुः सभां गच्छति, धिक् (उत्प्लुत्य) त्वामपि वराकं पूजयेत् ? धिक् त्वाम् ।

(इति प्रस्थिता)

कापालिकः— सिंहलेषु क्षुद्रतमा अपि द्वासप्ततिहस्तपरिमिता- इति प्रसिद्धिः सत्या एव ।

यत्र पुष्पाणां विक्रेत्री एवं स्थात् कथं वा तत्र कुलपुत्रिकाणां तैक्ष्ण्यम्, । इतो यामः । अनया पर्य्याकुलितां मतिं मदिरया प्रत्यवस्थापयामः ।

(इति प्रस्थितः)

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

प्रथमोऽङ्कः

चतुर्थदृश्यम् ।

स्थानम् राजसभा

(स्वासने सिंहलेश्वरः मन्त्री सेनापतिः दीर्घवेणीच)

(प्रविश्य द्वारी-प्रणम्य) संघसंस्थापकान् वीराधिवीर-

वरानुत्कलदूतः स्वावसरं प्रार्थयमानस्तिष्ठति ।

राजा—प्रवेशय

(द्वारी प्रस्थितः, दूतेन सह पुनरायातः)

उत्कलदूतः—(प्रणम्य) तत्र महताम् उत्कलकेशरिणां श्रीम-

दुद्योतदेवानामादेशहरोऽस्मि ।

राजा— ननु को घात्र उत्कलराजस्य आदेशहेतुः ।

दूतः— अयमेव-भवत्सु करुणा एव जगदेकवीराणामुत्कल-

केशरिणाम् ।

सेनापतिः— किमेवं प्रगल्भसे ?

दूतः— यथार्थं प्रगल्भाः कालिङ्गाः ।

आन्ध्राश्चोलाश्च गौडाश्च

सुबुद्ध्या वशतां गताः ।

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

सिंहलाश्छेदमिच्छेयु—
रथवा सम्पदं पराम् ॥

राजा— कथम्, उत्कलीयस्य राजन्यपोतस्य अनुग्रहेण परां सम्पदं लभन्ते सिंहलीयाः !

दूतः— महतां प्रसादो हि सौभाग्यसीमा शरीरिणाम् । Idiom.

दीर्घवेणी—अहो उत्तरोत्तरं वर्द्धते क्षुद्राणां गर्वस्फुलिङ्गः ! दूत ! अलमतः परम् किं वा तव प्रभुणा सिंहलनाथाय विज्ञापितमिति संक्षिप्तं कथय, न पुनरेवं प्रलापाः शोभन्ते ।

दूतः— राजनन्दिनि ! क्षम्यतामपराधः । को वात्र प्रलापः । आज्ञप्तं हि देवपादैः—

अभियानेषु वर्त्तन्ते कालिङ्गा बलशालिनः
सम्भावयत तान् नत्या शिरसो धनुषोऽथवा ।

दीर्घवेणी— ननु धनूंषि एव सिंहलानां सर्वदा नम्यन्ते ।

मन्त्री— उचितं स्थापितवती आयुष्मती । Dialogue.

दूतः— उत्कलेषु धनुषां नमनं हि न चारुतां मतीनामुपस्थापयति ।

सेनापतिः— नेयं कच्चुमूलदद्दूराणामुत्कलीयानां स्वगोष्ठी । idiom

राजा— दूत ! कथय गत्वा युष्माकं राजानं तेजीयसां तेजः,-

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

परीक्षास्वपि निकषाः सिंहलाः किं पुनरारकूटलसितानामुत्कलीयानाम्। यथेष्टमागच्छन्तु कालिङ्गाः।

दूतः— यद्वा किमपि मन्यन्तां भवन्तः। सौहार्देन कथयामि- दूरत एव उपायनैः प्रसाद्योऽयं महान् उत्कलः केशरी।

राजा— न वराकस्य उपदेशः अपेक्ष्यते - न वा क्षुद्राणां कलिङ्गानां साहसिकत्वम्।

दूतः— अहो !! कालिङ्गवीराः अपि कथं क्षुद्राः सिंहलेषु ? स्वव्यामोहस्य परेषु प्रसञ्जनं नैव शोभते।

राजा— मूर्ख ! क्रमेण हि अतिस्पर्द्धसे। बन्दीकुरुत एनं भटाः। (प्रहरिणौ तं बन्दिं कुरुतः)

राजा—नयत एनं निरोधयत। कालिङ्गाः मोचयित्वा नेष्यन्ते।

मन्त्री— विज्ञापयामि अत्र संत्रसंस्थापकेभ्यः वीराधिवीरवरेभ्यः किं वा भवति अस्य वराकस्य रोधेन ?

राजा—कटूनां खलु प्रलापानां परिणतयः सर्वथा भोक्तव्याः।

दीर्घवेणी— पितः।

अनुप्रास 'काका' वदति काकोऽयं सर्वानेवाविशेषतः।
स्वयं द्रवति सर्वस्मात् का वा सास्मिन् प्रतिक्रिया॥

अपिच तात ! शीघ्रमेवायं गच्छतु। शीघ्रं च श्रोतुमर्हति सिंहलवीराणां शौर्य्यपरंपरां कालिङ्गानां राजा।

सेना— एवमपि शोभनं स्यात्।

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

राजा— भवतु, भटाः, ! पथि विनैव कालहरणं प्रस्थापयत एनं सरित्पतेः अपरं तीरम् ।

सिंहलसैनिकौ —यथाज्ञापयन्ति प्रभवन्तः ।

दूतः—संप्रति उत्कलानां सेनाः सुवेलपर्वतस्य उपत्यकाम् अधितिष्ठेयुः ।

राजा—एवमपि स्यात्, प्रियमेव नः, त्वरितं प्रियं निवेदनीयं प्रियेषु कालिङ्गेषु ।

(दूतः नमस्कृत्य प्रस्थितः, प्रहरिणौ स्वनियोगमशून्यं कुरुतः)

राजा—मन्त्रिन् ! किमत्र प्रतिविधेयम् ?

मन्त्री—साहसिकाः हि कलिङ्गाः । सेनापतयः किं वा मन्यन्ते ।

सेना—महाभाग !

श्रीमतां सिंहलेन्द्राणां प्रतापोऽयं जयश्रिया ।
कलिङ्गानभितो यायात् किं पुनः स्वाङ्कमागतान् ॥

अपिच— आन्ध्राश्चोलाश्च कर्णाटा ये चान्ये दक्षिणापथे ।
मौलौ कुसुमवत् काम्यं दधते देवशासनम् ॥

मन्त्री—चोलादय एव इदानीम् अस्माभिः उपजप्तव्याः कालिङ्गनिरोधाय । policy

दीर्घवेणी—किं वा उपजापादिना ?

अन्यानुपेक्षमाणा हि सिंहलाः सिंहविक्रमाः
स्वभुजैः शात्रवं जित्वा भुञ्जते हि वसुन्धराम् ॥

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

मन्त्री-सत्यमेव आयुष्मत्या यदाज्ञप्तम् परन्तु समरविधयः एवं-विधानुपायान् अपेक्षन्ते।

दीर्घवेणी—यथा वा भवतु! आदिशन्तु एवमत्र सिंहलसम्राजः। सुवेलस्य उपत्यकासु एव कलिङ्गान् आक्रमितुम्।

राजा—एवं, सुवेलादेव निवर्तनीयाः कालिङ्गाः।

(प्रविशति सैनिकः)

सैनिकः— (प्रणम्य) देव! सिंहलोपकूलं चंक्रमन्ते कलिङ्गानां नौकाः।

राजा—सेनापते! विधीयतां प्रतिविधानम्।

सेना—(उत्थाय) यथाज्ञापयन्ति देवपादाः। इदानीमेव तान् उन्मूलयितुं गच्छामि। (इति प्रणम्य प्रस्थितः, तदनु सैनिकः)

राजा—मन्त्रिन्! उत्कलकेशरी स खलु प्रद्योतः अतिथिप्रियः आसीत् सरलो गम्भीरश्च।

मन्त्री—देवपादानां परमसुहृद आसन् तत्र प्रद्योत पादाः।

राजा—तस्य पुत्रोऽयम् अस्मानेव अभ्यायाति।

मन्त्री—किं वा न कारयति व्यामोहजा विजिगीषा।

दीर्घवेणी—अतश्चायं सिंहलेष्वपि स्वविक्रमं दर्शयितुम् आयाति। आयातु नाम-नितरां जागर्त्ति सिंहलेषु शस्त्रोत्कर्षपरंपरा।

(नेपथ्ये—वाद्यशब्दः)

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

मन्त्री—देव ! सम्प्राप्ता स्नानवेला ।

राजा—एते गच्छामः (इत्युत्थाय) एहि वत्से (दुहित्रा समं प्रस्थितः, अन्यया दिशा मन्त्री च)

प्रथमोऽङ्कः—पञ्चम दृश्यम्

स्थानम् शिविरम्

(राजा विचित्रा प्रविशतः)

राजा—विचित्रे ! सावधानैरस्माभिः सिंहलै र्योद्धव्यम् ।

विचित्रा-सिंहलेष्वपि उत्कलानां कः खलु अवधानस्य अवसरः ? लीलया एव अरीन् हन्तुमर्हन्ति साहसिकाः ।

राजा—साहसं सतर्कत्वं च समानमावश्यकम् ।

विचित्रा—यदादिशन्ति प्रभवन्तः । परन्तु-शपितोसि राजन् ! विचित्रया कनिष्ठया, न पुनर्विचित्रायाः शस्त्रधारण-सामर्थ्ये सति प्रभुभिर्योद्धव्यं सिंहलैः ।

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

राजा—(स्मित्वा) भवतु, यथासम्भवमेवं भवेत्। "पुत्रादिच्छेत् पराजयम्" किं पुनः सिंहलजयम्।

प्रविश्य—

प्रतिहारी—सिंहलस्य संवादवाहकः।

राजा—प्रवेशय।

सिंहलदूतः-(प्रविश्य, प्रणम्य) प्रेषितोऽस्मि तत्रभवता शार्दूलाक्षेण सिंहलसेनापतिना-संघसंस्थापकानां वीराधिवीरवराणां श्रीमतां-सिंहलेश्वराणां शासनं भवतः श्रावयितुम्।

राजा—किंरूपं शासनम्?

विचित्रा—प्रलापरूपमेव।

दूत—नहि नहि।

आन्ध्राश्चोलाश्च कर्णाटाः ये चान्ये दक्षिणापथे
मौलौ कुसुमवत् काम्यं दधते देव शासनम्।

स एव देवपादः कलिङ्गानां दयमानः शासनाक्षरं कृतार्थी करोति।

राजा—(स्मित्वा) कथमेवम्?

दूत—एवम्,

नमन् मित्रत्वमागच्छ मित्रस्येव सुतोसि नः
नैवं चेत् शिष्यसे नूनं ममाज्ञामतिलंघयन्।

विचित्रा—प्रलापोऽपि कस्य आज्ञा भवति?

राजा—सत्यम्, अचिरेणैव नश्येयुः सिंहलाः। याहि दूत! कथय

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

तव सेनापतिम्-उत्कलकेशरिणां परिसरेषु स्वयमेव पतन्तु भवन्तः इति ।

दूतः—यथाज्ञापितं महद्भिः केशरिभिः (प्रस्थितः)

(प्रविशति सिद्धवटुः)

सिद्ध—भो वयस्य ! दृढं प्रियोऽस्मि बुभुक्षायाः । एषा न मां क्षणमपि त्यजति, आः आः, अपि चोलेन्द्रनन्दिन्याः सनिर्वन्धा अभ्यर्थना अर्थवती अभविष्यत् ।

विचित्रा—न पुनः सेनानिवासपर्य्याप्तभोज्यैः भवतः बुभुक्षाप्रयोजनं सिध्यति ?

सिद्ध—नह्येवं भवति, ब्राह्मणस्य दुहितापि त्वं नैव किंचित् जानासि भोजनतन्त्रस्य उदरपूरणमात्रं न तत्र तत्त्वम् । विरलानां दुर्लभानां नवानामभीष्टानां च भोज्यानां काम्यत्वमेव भोजनतत्त्वम् ओः ओः-अवश्य (इत्यभिनीय सहसा) भो वयस्य ! उद्धरस्व ब्रह्महत्यायाः ताम् अबलाम् ।

राजा—ब्राह्मणोपतापिकायाः ध्वंस एव दण्डः । नाशयतु भवती अस्य उदरस्थां बुभुक्षाम् ।

विचित्रा—कः कोऽत्र भोः, वटोरुदरे शस्त्राणि निक्षिपत ।

सिद्ध-भवति ! मामैवम्, एते दास्याः पुत्राः मां सत्यमेव मारयेयुः ।

भो वयस्य ! त्रायस्व माम्, त्रायस्व मां, शरणं गतोऽस्मि । (इति राजानमालिङ्गति)

(पटक्षेपः)

—०—

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

## द्वितीयोऽङ्कः- प्रथमदृश्यम्

स्थानम् उद्यानम् ।

(प्रविशति चिन्तामन्थरा कलावती)

कलावती—अहो युद्धं युद्धमिति परमुत्सुका भवन्ति पुरुषाः । अवलास्वपि प्रियसख्याः खड्गवत्याः सदृश्यो वर्त्तन्ते युद्धप्रियाः । भगिनी दीर्घवेणिरपि दृष्ट्वापि महान्तम् उत्कलकेशरिणं युध्येत । तरला पुनः तामपि युद्धात् निवर्तयितुं सिंहलात् गतवती । अथवा युद्धैकपरायणायाः कुतो वा लोभनीयदिदृक्षा ।

(प्रविशति माधववर्मा चोलेश्वरः)

कला—यदि तात ! सिंहलोत्कलयो र्युद्धं वार्येत

माधवः-किमेवम्, अभिमततममिदं चोलानां दक्षिणापथानां च ।

कला—किमेवं तात !

माधव—सिंहलसमरेषु श्रान्ता हि कालिङ्गाः सुखं जेष्यन्ते ।

कला—किं वातू जयेन तात ?

माधव—किमन्यत् स्वदेशस्य अस्वातन्त्र्यं दण्डेषु चरमः प्राणभृताम् ।

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

कला—अस्वतन्त्रत्वं च तात ! युद्धमूलमेव. यदि-

माधव—किं वा 'यदि' कलावति !

कला—यदि तात ! युद्धमेव नहि स्यात् कस्य पुनरस्वातन्त्र्यं नाम स्यात् ?

माधव—जन्तोः स्वातन्त्र्यप्रियता हि युयुत्सां जनयेत्, न हि युद्धं स्वातन्त्र्यपारतन्त्र्ययोः प्रयोजकम् ।

कला—यद्वा आदिशतु तातः । को वा मानवानां सहस्रशो मारणं शोभनं वदेत् ?

मन्त्री—(प्रविश्य) शोभनं वदत्येव सिंहलानामधीश्वरः । स हि दूतमुखेन अवोधयत् काश्चित् युक्तीः ।

कला—पितामह ! किमत्रभवन्तोऽपि अत्यन्तं वृद्धाः युद्धात् निवर्त्तनं युक्तं न मन्यन्ते, प्रत्युत प्ररोचयन्ति ?

मन्त्री—आयुष्मति ! उचितपरामर्शैन मन्त्रिणः प्रवर्धयन्ति प्रभून्, न तत्र वयो वा अन्यद्वा प्रभवति ।

कला—अहो ! पुरुषाणां आशया एव एवं भवन्ति । कथं युद्धं विनैव शान्तिर्न स्वीक्रियते ।

मन्त्री—कथमित्थं राजनन्दिनि ! कालिङ्गानां विजिगीषा न कदाचित् युद्धं विना विनिवर्त्तेत, स्वभुजगर्विता एते सर्वानेवावमन्यन्ते । अत एनान् अभिजेतुं सर्वेऽपि चक्रवर्त्तिनः यतन्ते । नियतं पराजेष्यते महानुत्कलकेशरी ।

कला—को वा किं वा जानाति ?

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

माधव—चोलाः साक्षादुत्कलानां समाः समरकर्मसु
केरलाद्याः सहायाश्चेत् जिता एव कलिङ्गजाः ।

कला—नितरां सौहार्दनिधिः महानुत्कलकेशरी ।

माधव-को वा न प्रशंसति पुरुषेषु श्रीमदुद्द्योतम् । विजिगीषा
पुनरस्य वीरान् यथेष्टं क्षोभयति ।

(प्रविश्य)

प्रतिहारी—(प्रणम्य) देव ! आन्ध्रकर्णाटयोः दूतौ
प्रतिहारमपेक्षेते ।

माधव-बहिर्भवने एव द्रष्टुमर्हतः । (कलावतीम्) वत्से ! समभेव
भगवतः आरात्रिकां पश्यावः ।

कला—शीघ्रं प्रत्यावर्तन्तां तातपादाः (राजमन्त्रिणौ निष्क्रान्तौ)

कला-अन्यानपेक्षमाणानि हि प्रवर्तन्ते विधेर्विलसितानि । वालि-
कायाः आक्रन्दं न कोऽपि श्रोतुमपि इच्छति । परम-
जेया उत्कलकेशरिणः, साहसिकाः कलिङ्गवीराः,
असहना पुनः प्रियसखी दीर्घवेणी, अत्यन्तं समुत्सुकाश्च
युद्धार्थं तातादयः । किं वात मद्विधानां करणीयम् ?
परं शुभं भूयात् विभोः प्रसादेन ।

(इति प्रस्थिता)

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

## द्वितीयेऽङ्के द्वितीयदृश्यम्

स्थानम् वनभागः

(सद्यो ज्वलितेषु हुताशनेषु चरून् जुह्वत् कापालिकः, अदूरे अर्द्धविस्मितः शिष्यः)

शिष्यः (स्वगतम्) कदा वा अद्य स्वामिनां पूर्णाहुतिर्भवेत्। आज्ञापितमद्य स्वामिभिः किञ्चित् अद्भुतं दर्शयितुं, परं न बिभेमि यावद् वातू अद्भुतत्वम् आस्ताम्। अहमस्मि ब्राह्मणः, परं च कापलिकाग्रेसरस्य प्रियशिष्यः। यद्वा किमपि भवतु—परं च नितरां बाधते मां पिपासा बुभुक्षा च।

(इति सधैर्य्यइव अभिनयति)

कपालिकः

(होमं समाप्य) पूर्णाहुतिपूर्वनियतं व्रतं करोमि (इति उत्थाय पूर्णाहुतिं गृहीत्वा)

देवि शरणागतशुभवरदे श्यामायितजगत्त्रये श्यामे त्रिपुरसुन्दरि नरास्थिमालिनि शिवशवनर्तनपरा-

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

यणे—

नमस्ते नमस्ते नमस्ते। ओं श्यामायै स्वाहा।

(इति पूर्णाहुतिं दत्त्वा साष्टाङ्गं प्रणम्य, उपविश्य शिष्यं प्रति)

कापालिकः—किमये आयुष्मन्! अद्यापि तव कापि दिदृक्षा जागर्ति?

शिष्यः—(अञ्जलीकृत्य) अथ किम्?

कापालिकः— न पुन र्बिभेषि?

शिष्यः—भवतां सन्निधौ किं वा भयम्?

कापालिकः—अस्तु, व्रतारम्भमदिरामास्वादयामः

(पीत्वा साकाङ्क्षमपेक्षमाणं शिष्यं प्रति)

नूनमत्र आयुष्मता आश्चर्यदर्शनधृत्यर्थं मदिरा ग्राह्या।

(ददाति, शिष्यः पिबति)

कापालिकः-(किंचित् हुत्वा) देवि! त्रिपुरसुन्दरि! मुण्डमालिनि! खर्परपरशुधारिणि! प्रकटीकुरुष्व प्रकटीकुरुष्व आत्मानम्

(किमपि चूर्णं वह्नौ क्षिपति—कश्चित् शब्दो जातः, कालीमूर्तेराविर्भावश्च कापालिकः प्रणमति, शिष्यश्च प्रणम्य सकम्पमुपविशति)

कापलिकः-देवि! प्रियं ते किंचित् उपस्थापयामि। एत रे एत नृत्यत मातुःपुरतः। (इति मुद्रयाआह्वयति। भूताः प्रविश्य नानाविधं नृत्यन्तः निष्क्रामन्ति)।

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

कापालिकः—देवि ! किमप्यभीष्टम् आवयोः सिध्यतु । (उभौ प्रणमतः, देवी अन्तर्हिता च)।

कापालिकः—आयुष्मन् ! निवृत्तं भवतः कौतूहलम् ?

शिष्यः— गुरो ! तत् निवृत्तम्-परन्तु परःशतानि उत्तिष्ठन्ति ।

कापालिकः—भवतु वत्स ! पुनर्दर्शयिष्यते तुभ्यं अन्यदेवंविधम् । गच्छ त्वमिदानीं कुटीरम्, अहमत्रैव रात्रिं यापयामि । परं श्रीमता शीघ्रमेव अत्र समानेतव्या माल्यप्रिया ।

शिष्यः—यथाज्ञापयन्ति गुरवः ।

कापालिकः—यथायथं वर्णनीयः अस्मत्प्रभावः-परश्वो मङ्गलवारः, तथाविधाया नितान्तं प्रयोजनत्वम् (किंचित् चूर्णं दत्त्वा) अवश्यमिदं तां सेवयसि (सिन्दूरं दत्त्वा) इदं तस्या ललाटे धारयसि ।

शिष्यः—यथाज्ञापयन्ति गुरवः ।

कापालिकः—जानास्येव वत्स ! विना रक्तं न विना च रेतसा अस्माकमुपाया न समाधीयन्ते, अतस्त्वरितं यतेथाः

शिष्यः—यथादिशन्ति गुरवः ।

कापालिकः—गच्छ, प्रातरेव तत्र यासि ।

शिष्यः—यथाज्ञापयन्ति (गतः)

कापालिकः—माल्यप्रिया एव प्रथमं वशीकर्तव्या (क्षणं तूष्णीम्) का वात्र चिन्ता, अवश्यं सिध्यति रोर्गृहीतम्

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

इन्द्रजालम्, अवश्यं मया लभ्यते माल्यप्रिया, अवश्य-
मेव लभ्यते, पानपरंपराया हि जनः परमानन्दी भवति ।

(पुनः पिबति)

पटक्षेपः

द्वितीयेऽङ्के तृतीय दृश्यम् ।

राजपथः

(प्रविशति पदुमा तदनु मुक्ताचन्दनगोरोचनादीनि
गृहीत्वा तत्सहचरी पृथुका च)

पदुमा—पृथुके ! त्वरितमेहि, त्वरितं गच्छावः सिंहलेन्द्र-
दुहितरं, सा हि उत्कलैर्योद्धुं त्वरमाणा वर्तते ।

(प्रविशति नागरिकः, पदुमा तं स्थिरं पश्यति)

नागरिकः—अयि ! किमेवम् ? तरलानि अपि मुक्ताफलानि त्वद्-
क्ष्णोः निश्चलानि दृश्यन्ते ।

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

पद्मा—(विहस्य) निरीक्ष्यन्ते हि नितरां भवत्सु महानागरेषु मुक्तानां फलानि।

नागरिकः—अयि! न मुक्तानां फलानि त्रिजगति कामचाररूपाणि अन्यानि वा आङ्काङ्क्षामः। वयं हि—

कामं चन्दनसर्वाङ्गाः मुक्ताफलविभूषणाः
सिंहलान् विचरिष्यामः त्वादृश्यो यत्र नायिकाः

पद्मा—एवम्, सर्वमिह भवति। किं वा रोचते भवते।

नागरिक—सत्यम्, मया क्रेतव्यानि मुक्ताफलानि गोरोचनाश्च। इदानीम् आगच्छति भवती मद्गृहान्?

पद्मा—गच्छतु भवान्, अहमिह राजकन्यां सम्भाव्य अनुपदमेव गच्छामि।

नागरिकः— जानासि अस्मद्गृहम्?

पद्मा-का वा न जानाति, वणिजो वसुपोतस्य प्रसिद्धान् गृहान् लङ्कायाम्।

नागरिकः—तेन हि अवश्यम्—

पद्मा— न पुनरस्यां न विश्वसिहि। (उभयतः प्रस्थिताः)

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

द्वितीयेऽङ्के चतुर्थं दृश्यम्

कक्षा

(दीर्घवेणी तरला च)

दीर्घवेणी—सखि ! अन्यदपि किंचित् अभिनवं असम्भवं च ब्रवीति सा कलाकेलिः।

तरला—किमिदमसम्भवं मन्यते भर्तृदारिका।

दीर्घवेणी—असम्भवतमं मन्ये युद्धादस्मान्निवर्तनम् !
समारोप्यैव होमाग्निं कथं सिध्येत् शमाम्बुना ॥

तरला—अग्नेरवस्थानस्य विनाशार्थमेव।

दीर्घवेणी—विनैव समुचितामाहुतिम् ?

तरला—स्वस्य हृदयस्था द्वेषादय एव तत्र आहुतयः।

दीर्घवेणी—कथं वैरिणि युयुत्सौ द्वेषं त्यक्ष्यन्ति सिंहलाः ?

तरला—भवत्याः सदुपदेशेन।

दीर्घवेणी-कथमभ्यायातेष्वपि शत्रुषु शिरोनमनार्थमुपदेशस्य साधुत्वम् ?

तरला—महाप्राणानां मानवानां रक्षणाय उपदेशः कल्पते।

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

दीर्घवेणी— अहो: परमिदमाश्चर्यं: शत्रुषु अस्वतन्त्राणामपि कीटकल्पानां महाप्राणत्वम् ।

तरला— राजनन्दिनि ! न पुनरुत्तरोत्तरं त्वां निर्बन्धयितुमीशे, किंवा न रोचते प्रियसख्यै सर्वधर्मेषु पुरस्कृता अहिंसा ? तत् सानुग्रहं निवारयतु प्रियसखी सिंहलेषु युद्धम् ।

दीर्घवेणी— ममाप्येवं प्रियसखि ! न पुन: पुन: पुनः त्वां अवरुन्धे । तत्त्वं कथयामि । भगवद्बुद्धानुशिष्टामहिंसां का वा न बहुमानयेत् । परन्तु वीराणां परंपरा पालनीया खलु कुलजैः । अत:परं वा दीर्घवेणी विधेया भवति युवयो: । विज्ञाप्या च सकण्ठालिङ्गनं सा प्रियसखी चोलेन्द्रनन्दिनी कलाकेलि:—

प्रस्ताव हि तवोदारं मानयामि दृढं रमे ।
परं मामनुमन्यस्व कालिङ्गै: सह योधनम् ॥

तरला— यथाज्ञापयति प्रियसखी । प्रियसखि ! अपि दृष्टपूर्वा भवत्या केशरिपादा: ?

दीर्घवेणी— ( निःश्वासमवरुध्य ) ओं, एकदा गोदावर्य्यां दृष्ट: स भवान्, परन्तु वत्सरपंचकात् पूर्वमेव ।

तरला— अत: परस्परदर्शनाकाङ्क्षिणौ युवाम् ।

दीर्घवेणी— किमेवं, सर्वा अपि आत्मना स्वसख्या वा तुलयसि !

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

तरला— न हृग्येवं प्रियसखि ! एष हि लोकानां स्वभावः । नवी-
नस्य सुधाकरस्य कलानामुपचयं बालचूतलति-
कायाश्च सुमनसां सम्भारं सादरमपेक्षन्ते ।

दीर्घवेणी— न च प्रियसखि ! शुभेषु समरावसरेषु अन्यत्
किंचिदपि स्पृशति दीर्घवेणीया मानसम् ।

(गायन्ती प्रविशति पदुमा प्रणम्य)

शुचिरिय मेकावली चारु विधाना
सुविमलकान्तिपूरा सुखनिधाना पदम् ।
सुधीततिमर्तिरिव चिरमुदारा
विलासिनी जनमनो नयनकारा
लभते विकाशमिमामिह दधाना । १ ।

पदुमा— भर्तृदारिके ! गृहाण इमामपेक्षितामेकावलीम् ।
(तस्याः कण्ठे धारयति)

दीर्घवेणी— (मालां समीक्ष्य) साधु विरचितं त्वया ।

(पदुमा प्रणम्य निष्क्रान्ता)

तरला— भर्तृदारिके ! किमियं बहुमूल्या एकावली पूर्वमेव
अपेक्षिता ?

दीर्घवेणी—अथ किम् ? कृष्णायाः प्रत्यावर्तमानया मया कस्या-
श्चित् वणिगङ्गनायाः मालां दृष्ट्वा ततोऽपि मूल्याधिका
काचित् एकावली प्रियसख्यै कलाकेलये मागिता ।

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

इदानीमिमां प्रियसखीं मन्यमाना कण्ठे धारयामि। तद् गृहाण इमाम् ( इति उन्मुच्य दत्त्वा ) प्रियसखि! कथयिष्यसि तां कलाकेलिम् अवसरेषु केलीनां स्मर्त्तव्या दीर्घवेणी।

तरला— मामेवं प्रियसखि! सर्वदा स्मरति भवतीं भर्त्तृदारिका द्रष्टुं च नितरामुत्कण्ठते।

दीर्घवेणी— तथापि न प्रत्ययनीयाः चोलानां कुमार्य्यः।

तरला— किंवा का वा तव अविश्वासबीजमजनयत्?

दीर्घवेणी— ( हसित्वा ) सहस्रं त्वं, लक्षं कलावती।

तरला— अतश्च तस्यै दशलक्षं ददाति भवती।

दीर्घवेणी— किमियं माला कलावत्याः अपि उपहारभावमर्हति अमूल्यं हि उपायनं कलाकेलिगुणेभ्यः सर्वथा स्मरिष्यथः सख्यौ।

तरला— का वा त्वामपि विस्मर्तुं प्रभवति-अनुमन्यस्व प्रियसखि!

दीर्घवेणी— इदानीमेव गच्छसि?

तरला— नायमवस्थानावसरः गच्छामि प्रियसखि! शुभोदर्कायं इदं युद्धं भवतु।

दीर्घवेणी— एवं भवतु प्रियसखि! देहि मे आलिङ्गनम्।

( इति आलिङ्गतः )

( पटपरिवर्त्तः )

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

## द्वितीयेऽङ्के पञ्चमदृश्यम्

घनम्—कापालिकस्य साधनास्थानम्

(प्रविशति कापालिकः)

कापालिकः- काममद्य पूर्यते कामः, आगतप्रायां माल्यप्रियां मन्ये (किंचित् पीत्वा आसने सगाम्भीर्यमुपविशति, प्रविशतः अध्वगवेषः शिष्यः पूजासामग्रीं हस्ते कुर्वती माल्यप्रिया च, उभौ कापालिकं साष्टाङ्गं प्रणमतः)

शिष्यः— भवति ! क्षणमपेक्षावहे, समाप्तप्रायः स्वामिनां सामाधिः।

माल्यप्रिया— एवं भवतु (सामिनिवेशं निर्वर्ण्य स्थिता) (कापालिकः ध्यानभङ्गमभिनीय तौ पश्यति, तौ पुनः प्रणमतः)

कापालिकः— (आशिषमभिनीय) स्वागतं ते भद्रे ! देवी प्रसिदतु।

माल्यप्रिया- (तं नमस्कृत्य सामग्रीं तदन्तिकमुपनयति)

कापालिकः - उपविशतु भवती।

(माल्य प्रियाएकत. शिष्यश्च अन्यतः उपविशतः, कापा

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

लिङ्कः किंचित् पीत्वा देवीं पूजयति )

कपालिकः—(पूजां समाप्य नीराजनां ज्वालयित्वा, किंचित् पीत्वा) माल्यप्रिये ! नीराजनावकाशे त्वयापि किंचित् पातव्यम् (किंचिदुपनयति, सा सलज्जं पिबति, शिष्याय किंचित् ददाति स पिबति )

कापलिकः- ( नीराजनां गृहीत्वा ) देवि ! त्रिजगद्भयदात्रि वरदे शिवदे शिवे शान्ते घोरे प्रसीद प्रसीद ।

[ नीराजयति, सर्वे देवीं प्रणमन्ति ]

कापालिकः- [ पुनः किंचित् पीत्वा ] उत्तमाङ्गने मन्ये किंचिदाश्चर्य दर्शनार्थमुत्सुका भवती, अवश्यं भवतीं साक्षाद् देव्या समालापन समर्थां करोमि । प्रथमं तावदाकाशं पश्य, देवाः कालिकायाः पूजां कुर्वन्ति ।

( सर्वे आकाशं पश्यन्ति, माल्यप्रिया शिष्यश्च साश्चर्यौ जातौ )

कापालिकः- देवी पुनर्देवानां पूजां स्वीकृत्य मर्त्यमवतरेत् । तद्दर्शनार्थमस्माभिः पूर्वकृत्यं समाधातव्यम् । (शिष्यं प्रति) आयुष्मन्, भवत्या अभ्यवहारार्थं किंचिदानेतुमर्हसि , बुभुक्षितश्च भवान् ।

शिष्य—( साञ्जलि ) यथादिशन्ति स्वामिनः [ गच्छन् स्वगतम् ] प्रथममेव शर्मणा स्वभोजनं समाप्येत ( गतः )

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

कापालिकः- प्रिये !

( माल्यप्रिया चकिता भवति )

कापालिकः- ( तस्याः पृष्ठमालभ्य ) किमेवं भद्रे ! कातरा भवसि ?

नायं व्याघ्रः ।

( माल्यप्रिया तूष्णीमेवास्ते )

कापालिकः- नियतं देवीं साक्षात् प्रार्थयितुमुत्कण्ठिता भवती ।

माल्यप्रिया—स्वामिनामनुग्रहश्चेत् ।

कापालिकः- सुन्दरि ! त्वद्विधानामभीष्टसमाधानाय यतनं न अनुग्रहः, किन्तु कर्त्तव्यमेव ।

माल्यप्रिया—( अञ्जलिं बध्नाति )

कापालिकः— ( तां पुनरालभ्य ) पूर्वकृत्यं शीघ्रमेव सम्पादयावः प्रसीद तावत् ।

माल्यप्रिया— कीदृशं पुनः पूर्वकृत्यम् ?

कापालिकः— किमन्यत् ? विना हि रेतःसाधनं सिद्धिर्न भवेत् ।

माल्यप्रिया— ( सगाम्भीर्यम् ) कोऽत्र भवतः अभिप्रायः ?

कापालिकः- ( हसित्वा ) कोवाऽन्योऽभिप्रायः, सस्मितं सकृत् अवलोकय त्वम् ।

माल्यप्रिया—किमेवम् ?

कापालिकः- ( तां हस्ते गृह्णन् ) न वा जानीषे प्रेयसि ! चिरान्ममाभीष्टम् ?

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

माल्यप्रिया ( हस्तं विच्छिद्य ) धिक्, किमेवम् ?

कापालिकः- अये, किं पुनः किमेवं किमेवमिति ? सज्जं शयनम् ।

माल्यप्रिया— धिक् हताश यामि ( गन्तुमारभते )

कापालिकः- ( तां हस्ते गृहीत्वा ) क्वापयासि ? न पुनर्देवीं द्रष्टुमिच्छा वर्तते ?

माल्यप्रिया— [ हस्तमपच्छिद्य ] नाहं पापस्य इन्द्रजालं द्रष्टुमिच्छामि !

कापालिकः- इन्द्रजालम् इच्छ वा मा इच्छ, अवश्यं मामिच्छेः ।

माल्यप्रिया— धिक् त्वां हताश !

कापलिकः— ( सक्रोधम् ) अरे सिंहलेन्द्रसुतापि मां सकामं वरयेत, किं पुनस्त्वं गर्भदासी किमुच्यते ?

( माल्यप्रिया न किमपि वदति )

कापालिकः-- किमत्र बलात्कारेण भुज्यसे ?

( पुनरस्या हस्तं दृढं गृह्णाति )

माल्यप्रिया—धिक् धिक् आसुर, कः कोऽत्र भोः ! रक्षत रक्षत ।

कापालिकः— ओः यथेष्टमाक्रन्द, परं पतितासि मद्धस्ते स्वीकृतिं विना न ते निस्तारः । इयमालिङ्गयसे ।

( माल्यप्रिया सभयं तथा तथात्मानं मोचयितुं यतते, कापालिकस्तामालिङ्गितुं चेष्टते )

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

माल्यप्रिया— रक्षत रक्षत !

कापालिकः- यथेष्टमाक्रन्द, अवश्यं भोक्तव्या मया ।

( तथा एव चेष्टते )

[ प्रविश्य दीर्घवेणी उद्यतेनासिना तमाक्रामति ]

स च छागइव भीतो जायते । माल्यप्रिया साश्चर्या भवति ]

दीर्घवेणी— श्रीमत्सिंहलेन्द्रस्य शासनेष्वपि एवंविधा मन्दानां प्रवृत्तयः ( हन्तुमुद्यतते )

विचित्रा—( प्रविश्य ) क्षाम्यतु वा इमं भण्डं भिक्षुकं देवि !

दर्शिता सिंहलेषु कुमारीणां शस्त्रेषु निपुणता, अपि सैव भवती वीराग्रगण्या दीर्घवेणी ।

दीर्घवेणी— दीर्घवेणिरेवाहं न पुनः किमपि ।

विचित्रा—एवम्, स्वीयैरेव गुणैः महीयसी भवसि । स्थाने खलु प्रियसख्याः कलाकेल्या अचञ्चलाः वृत्तयः शोभन्ते ।

(इतिसबहुमानं पश्यति, दीर्घवेणी तूर्यं ध्वनयति )

( सैनिकौ प्रवशतः )

दीर्घवेणी— नयत इमौ वन्दीकृत्य , सागरस्य पारं प्रापयत !

(सैनिकौ तौ वन्दीकुर्वतः )

दीर्घवेणी— ( माल्यप्रियाम् ) हण्डे कथमेवम् ?

माल्यप्रिया— भर्तृदारिके ! भण्डस्य इन्द्रजालं प्रभावं मन्यमाना

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

आगता एवं दुर्दशामनुभवन्ती भर्तृदारिकया रक्षितास्मि

दीर्घवेणी— भवतु, स्वगृहं गच्छ । ( तूर्यं ध्वनयति, प्रविशति सैनिकः ) भद्र ! एनां निरातङ्कं स्वगृहं प्रापय ।

सैनिकः— यथा ज्ञापयति भर्तृदारिका ।

माल्यप्रिया— अनुगृह्णातु दासीं भर्तृदारिका ।

( उभौ प्रणम्य गतौ )

विचित्रा—राजेन्द्रनन्दिनि ! परां सिंहलेषु व्यवस्थां पश्यामः ।

दीर्घवेणी— महाभागे ! सिंहलेश्वरस्य शासनं सर्वगतम् ।

अपि भवती— सैव— भवेत् ( सस्पृहं पश्यति )

विचित्रा— कां वा शङ्कसे राजेन्द्रनन्दिनि !

दीर्घवेणी— तामेव—तां— पुष्कराक्षेण कथितमुत्कलानां कन्यकाम्— नामतः—विचित्रां—एवम्—विचित्रा एव— कथितं पुष्कराक्षेण विचित्रा एव सिंहलान् विजेतुं कामं प्रभवति किं पुनर्देवपादा इति ।

विचित्रा—[ स्वगतम् ] अहो ! पुष्कराक्षस्य विचित्रायां पक्षपातः, ( प्रकाशम् ) अतिरञ्जितमेव तेन स्वदेशप्रेमिकेण ।

दीर्घवेणी— अपि त्वामधिकृत्य एव तस्य तदतिरञ्जनम् ?

विचित्रा—एवम्—इयमेव सा विचित्रा ।

दीर्घवेणी—इदानीं सिंहलेषु युद्धे सैनापत्यं प्रापिता ।

विचित्रा— बहुषु कश्चिदिति न्यायेन भारं प्राप्तास्मि ।

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

अप्यहं युद्धेषु सैनिकान् परिचालयन्तीं त्वामेव लभे ?

दीर्घवेणी— अथ किम्, मया स्वेच्छया एव गृहीतं कलिङ्गैरायोधने सैनापत्यम् ।

विचित्रा—शोभनं भवति भवादृशीनां सेनासु आधिपत्यम् । मोदामहे श्लाघ्यप्रतिपक्ष लाभेन ।

दीर्घवेणी— अपि कथं सिंहलेष्वपि प्रतिरक्षनेत्री भवती एकाकिनी-भ्राम्यति ?

विचित्रा— ( स्मित्वा ) किमित्थं परीक्षते कुमारी ! सानुचरा एव कलयामि ।

दीर्घवेणी— भवतु- कलयतु आयुष्मती यथेष्टं बलं सिंहलानां, परन्तु कलनीयं बहुवशिष्येत ।

विचित्रा—महनीयगुणासि, स्थाने एव अभिनिवेशः कलाकेल्याः ।

दीर्घवेणी— प्रियसखि ! न पुनरतः परं विलम्बेन । चोलेन्द्र नन्दिन्याः प्रियसखीष्वेव सुलभेन कलाकेलिपदेन विश्वस्तास्मि त्वमपि मम प्रियसखीएव आलिङ्गस्व माम् ( इत्यालिङ्गति )

विचित्रा —प्रियसखि ! इतो गच्छामि, अनुमन्यस्व ।

दीर्घवेणी—एवम , प्रियसख्या सेनाः सिंहलानां प्रतिपक्षत्वेन सावधानं परिचालयितव्याः ।

विचित्रा—प्रियसखि ! सिंहलेष्वपि कलिङ्गानां क इव बलप्रयोगावकाशः ?

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

दीर्घवेणी— एवमेव मन्यन्ते नाम कालिङ्गाः ।

विचित्रा— बाढम्, नास्त्यत्र मननस्यावश्यकत्वं, सत्यमेवैतत् ।

दीर्घवेणी— एवं स्वदेशीयेषु शोभनं श्रूयेत ।

विचित्रा— प्रियसखि ! युद्धं प्रवर्त्तते, यथेष्टं प्रकाशयावः स्वशक्तीः किमत्र विचारणया ?

दीर्घवेणी— साधूक्तं प्रियसखया, युद्धमेव हि वीराणां निकषः अवश्यमचिरात् पश्यामि युध्यमानां भवतीम् ।

विचित्रा— कामं राजपुत्रि ! विचित्रापि चिरात् काङ्क्षति दीर्घवेण्याः परीक्षणम् ।

दीर्घवेणी—(स्मित्वा) एवं भवतु, प्रियसखि ! देहि मे आलिङ्गनम् । (इत्यालिङ्ग्य) जन्मनि इह पुनर्लभ्यते नवा तत्पुनः आलिङ्ग्य (इति उभे गाढं आलिङ्गतः)

(पटक्षेपः)

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

द्वितीयोऽङ्कः षष्ठं दृश्यम्

उद्यानम्

[ प्रविशतः श्रीमदुद्योतः सिद्धवटुश्च ]

राजा— वयस्य ! कामं रमणीयाः सिंहलाः ।

सिद्ध— भोः ! अवश्यमेवम्—यतः भवान् उत्कलीयः प्रशंसति ।

राजा— अवलोकयन् सिंहलान् निसर्गमधुरान् उत्कलान् एव दृढं स्मरामि—अत्र हि—

वनं जलनिधेस्तीरे प्रसन्नाः सर्वतो दिशः ।
आम्रादिभिर्विशीभन्ते केदाराः शस्यपूरिताः ।

अपिच— परं संदृश्यन्ते युवतय इतः शस्त्रनिपुणाः
गृहेभ्यः शूयन्ते सततमिह सच्छास्त्रविषयाः ।
बहुत्वं रत्नानामपि भवति पण्येषु सुतरां
गुणः सर्वोऽप्येषामनुहरति कालिङ्ग विभवम् ।
वयस्य ! एष्टव्यं हि सिंहलैः समरम् ।

सिंहल देश का वैभव

सिद्ध— भो वयस्य ! अत्रेयं राजकन्या एव सेना नयति कथं विचित्रा एव तत्रभवती ।

राजा— सत्यम्, विचित्रां दीर्घवेणी उत्कलानपि तृणाय मन्यते ।

सिद्ध— परं सत्या हि विचित्रा अस्माकं कल्पितमस्या विचित्रा त्वमपनयेत् ।

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

राजा—गौडेषु दृष्टसाहसा खलु सैव वाहिनीपतिसुता विचित्रा।

सिद्ध— इयमेव सिंहलविजयाय परं कल्पेत।

राजा— किं वाऽत्र चित्रम्! सर्वथा जयनशीला विचित्रा।

(प्रविश्य) उत्कलसैनिकः—यदादिशन्ति देवपादाः, एषा हि सिंहलान् कालयन्तीव स्थानात् स्थानान्तरमधिकरोति।

राजा— भद्र! न किमपि प्रतिपद्यते सिंहलेश्वरनन्दिनी?

सैनिकः—श्रुतमेवं देव! सा हि कस्मिंश्चित् विषमे व्यूहं रचयति।

राजा— तेन हि विषमं समीकुर्वन्तु अचिरात् भवन्तः।

समां च सिंहलेश्वर पद्धतिं विषमां कुर्वन्तु।

सैनिकः— यथादिशन्ति प्रभवन्तः [इति प्रणम्य निष्क्रान्तः]

सिद्ध— भो वयस्य! सत्यं ते कथयामि। स्वीकुरुष्व शतानामुद्राणां पर्याप्तम् [अभिनयति]

राजा— सत्यं चेत् कथयसि, एवं भवतु।

सिद्ध— यदि द्वे सत्ये कथयामि—

राजा [स्मित्वा] महोदरमितानां भोजनानां द्विशती प्रतिश्रूयते।

सिद्ध— (सानन्दम्) चिरंजीव, चिरं वर्द्धस्व भो वयस्य!

प्रथमं तावत् सत्यम्, सिंहलान् अवश्यं जयेम।

राजा— भवतु, जितं भोजनानां शतम्।

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

सिद्ध— द्वितीयं च त्वयि दृढमनुरक्ता तत्भवती कलावती।
न हि सुधानिधिं विहाय अपरं कामयते पौर्णमासी।

राजा— परन्तु सखे! शुभेन भागधेयेन नरः चोलेन्द्रनन्दिन्याः अनुरागं लभेत, अन्येवं स्यात्—।

सिद्ध— एवमेव भवेत्, न पुनर्भवान् मामपि मर्त्येषु बृहस्पतिं मिथ्यावादिनं करोतु।

राजा—[ स्मित्वा ] सत्यम्, त्वादृशानां वचनानि सर्वत्र फलन्ति।

सिद्ध— किं नह्येवं भवति? यज्ञोपवीतं स्पृशामि ( स्पृशति ) ब्राह्मण्येन शपामि, अपरं च अपरं च. यद्यपि न उच्चारयितव्यं तत् तथापि प्रत्यर्थार्थं तत्र वदामि। परन्तु एवं कदापि न भवतु। वदामि—मम तस्या एव ब्राह्मण्या जीवितेन शपामि, न हि ब्राह्मणवचनं विफलं भवेत्, अवश्यं सा त्वां लिप्सते, अवश्यं लप्स्यते।

राजा—सखे! एवं ते शुभाय कल्पन्तां वचनानि. सत्यम्, कलावत्यपि अस्मिन् रमत इति न खलु लघ्वी श्लाघनीयता पुरुषस्य।

सिद्ध— भो वयस्य! स्वतः श्लाघ्येषु हि तादृश्यः रमन्ते।

राजा— यथा वा भवतु, सिंहलजयादपि अधिकं मन्ये कलावत्याः प्रसादम्। किं वान्यद् वदामि—

सिंहलान् चोलकर्णाटानन्यानापि रणे जितान्।
स्वतन्त्रत्वं प्रापयामि मन्यते चेत्कलावती।

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

सद्ध— भो वयस्य ! मन्ये चोलाद्याः सिंहलैः उपजप्ताः सन्ति ।

राजा— सन्तु कामं, छागैः मेषादीनां सम्मेलनेन कथं सिंहोऽपि क्षुभ्यति ।

शत्रून् संमिलितानेव नाशयन्त्येव हेलया ।

कलिङ्गवीराः मन्यन्ते विजयं स्वकरं गतम् ।

( प्रविशति बन्दिं गृहीत्वा सैनिकः )

उत्कल सैनिकः— [ प्रणम्य ] महाराज ! अयमत्र बन्दीकृतः सिंहलान् प्राप्तः चोलदूतः ।

राजा— चोलः खलु भवान् ?

दूतः— यथाज्ञापयन्ति देव पादाः ।

राजा— अपि सिंहलेश्वराय कंचित् सन्देशं हरसि ?

दूतः—गृहीतमेव तत् पत्रादिकम् उत्कलीयैः ।

राजा— प्रतियास्यसि वा संप्रति चोलान् ?

दूतः— ( तूष्णीं तिष्ठति )

राजा— कथम् अद्यापि भवतः सिंहलेश्वरदिदृक्षा वर्तते !

तत् कामं गच्छतु, कामम् एकीभवन्तु ससिंहला दक्षिणापथाः । एवं हि भवत्स्वामिनं कथय ।

सम्मेलनं हि सर्वेषां युष्माकं ह्यस्मदीप्सितम् ।

संहतानेव जेष्यन्ति शत्रूनुत्कल वासिनः ।

यथेष्टं गच्छ ।

दूतः—यथादिशन्ति महान्तः केशरिपादाः ( इति प्रणमति )

पटक्षेपः

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

तृतीयाङ्के प्रथम दृश्यम्

राजपथम्

चारणः गायतिः—

जागृत जागृत विजयिकालिङ्गाः
प्लावितरिपुकुल- समरतरङ्गाः
श्रुति पु पुराणे स्मरणवितानै
तन्नितसाहस-कृतपर भङ्गाः।

प्रोन्नत मूर्त्ती— भवतां कीर्त्ती—
विभ्रति गिरयः सूच्छ्रितशृङ्गाः
गायति गोदा वाति बहुदा नृत्यत इत इह चित्रा गङ्गा । १ ।
भानुमदाद्याः पूर्वे योधाः
आसन् सरभस- समरासङ्गाः
अभयदिहैरो मुख्यो वीरो बोधत तस्य कथा अतितुङ्गाः २ ।

( प्रस्थितः )

[ प्रविश्य ] नागरिकः-- सत्यम्, जागृत कालिङ्गाः, सत्यम् स्ववीर्य्यं चालयितुमियमुदारा सरणी, चोलादीन् उपजप्तान् विजित्य सिंहलविजयेन अभ्यर्थयामहे । नपुनरीदृशः सुयोगः केशारिणामपि राज्ये कदाचित् लभ्यते ( तूर्यं ध्वनयन् प्रविशति सेनाध्यक्षः )

सेनाध्यक्षः— ( पत्रिकां पठति ) अत्र महताम् उत्कल केशरिणां

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

श्रीमदुद्योतदेवानामाज्ञा, उत्कलीयाः स्वीयाभिरुच्च-
कलाभिः कृष्णायाः सिंहलं यावत् कण्टकानि उद्धृत्य
तिष्ठत, सत्वरमेव वयं सिंहलविजयं संपादयामः इति

नागारिकः— नमो देवपादेभ्यः, शिरसा गृह्णामि देवादेशम्
(नमति)

सैनाध्यक्षः— ( पुनः पठति ) महतामुत्कलकेशरिणां प्रधानमन्त्रि-
भिरिदमाज्ञप्तम्—

स्वतः साहसिका यूयं कलभिर्विशदीकृताः ।
भाग्यं भाग्यवतां नेता श्रीमानुद्योतकेशरी, । इति

नागारिकः— ( नम्रीभूय ) सुष्ठु आज्ञापितम्—महतामुत्कलानां
धुरन्धरस्तत्रभवान् ( सैनाध्यक्षं प्रति ) बलिन् !
कदा गन्तव्यम् ?

सैनाध्यक्षः— वीर ! न हि अभियियासोर्वीरस्य शोभन्ते एवंविधाः
प्रश्नाः । एते प्रारब्धवन्तो वयम् ।

नागारिकः— बलिन् ! इत्थं जानाम्येव, परं दुर्जयपुरमभियातो
मद्भ्राता, कथं तेषां विजयं न श्रुत्वैव गमिष्यामः ?

सैनाध्यक्षः— किमुच्यते, वीरस्य हि नास्ति विजयशुश्रूषा, न हि
सः समरेषु प्रवर्तते विजयमनुभवामीति वीराणां
वीर्याण्येव स्वातन्त्र्यं भुञ्जन्ति ।

नागारिकः- बलिन् ! उद्बुद्धाः स्मः भवद्युक्तिभिः, अग्रतोभव ।

( इति प्रस्थितौ )

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

तृतीयेऽङ्के द्वितीय दृश्यम्

स्थानं ... कक्षा

( उपविष्टा कलावती )

गीतम्:—

विमलममलतमे प्रकाशते परिपूते
न पुनराविल इह फलति कलुषचित्ते । ध्रुवम् ।
मनसि विमलीकृते परमनो निरीक्षते
त्रिजगतीपतिप्रभूराजते विमलाचित्ते । २ ।

( गीतान्तरे तरलायाः प्रवेशः— )

तरला— एवं हि कस्यचित् जनस्य निर्मले हृदये कस्यचित् निर्मला मूर्त्तिः सदैव स्फुरति ।

कलावती— ( सलज्ज स्मितम् ) दृढं तव हृदये स्फुरतु ।

तरला— किमिह भवतीमधिकृत्य अवदम् ?

कलावती— किम् एवमुक्तं मया ?

तरला — अर्थतः ।

कलावती—परन्तु किं तव हृदये स्फुरति ।

तरला— इदमेव ।

कलावती—किं तत् ?

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

तरला— कस्यचित् विमले हृदये उज्ज्वला काचित् मूर्तिःसततं प्रकाशते।

कलावती—कस्य सा मूर्तिर्भवेत् ?

तरला— न पुनरेवं कथयामि।

कलावती—किं वा न कथयसि ?

तरला— कुत्रेति, कस्येति, किमिति च कथयामि।
न पुनः मूर्त्तिमतो नाम उच्चार्यते।

कलावती—परमेवं माननीयतमो भवति स आर्यः ?

तरला— स एवेति कथं निश्चितम्।

कलावती—क एवेति।

तरला— न पुनर्नाम प्रकाश्यते।

कलावती—[ तां स्वासने उपवेश्य ) न वा कथय तरले, किं वा श्रवणेन ?

तरला— एवं जप्यस्यापि अन्यस्मात् श्रवणं जपे प्रत्यूहो भवति।

कलावती—(स्मित्वा) परं प्रियसखि ! किमेवं उपहससि। न वा स्मरणीयः गुणानुरक्ताभिः स भवान्।

तरला— परन्तु कलावत्या एव महान् अभिनिवेशः।

कलावती—न पुनः

तरला— किं पुनः ?

कलावती—न पुनः सखि दीर्घवेण्या अभिनिवेशः ?

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

तरला— कथमेवं स्यात्। न मया तस्याः किमपि तथा दृष्टम्।

कलावती— दृष्ट एव प्रसङ्गमात्रेण निःश्वासरोधः।

तरला— परन्तु, न सम्भाव्यते।

कलावती—किमसम्भवं दैवस्य, सापि हि सिंहलराजेन्द्रनन्दिनी स्वयं च वीराणामपि वन्दनीया प्रियसखी खड्गवती।

तरला— तथापि न विश्वसिमि, मम हृदये निश्चितमुदेति, संमेलनाय एव विधाता असृजत् श्रीमदुद्योतं कलावतीं चेति।

कलावती—पारे खलु मनोरथानां वर्तते।

तरला— नैवं प्रियसखि! श्रुतं मया प्रियसख्याः विचित्रायाः दृढमनुरज्यति त्वय्ययम्।

कलावती—किमिव वा नानुमिनुतः प्रियसख्यौ, परन्तु प्रियसखि!

तरला—किंपरम्?

कलावती—अवश्यमेव सिंहलविजयिनं श्रीमदुद्योतं तथाविधां च ताम् अभिमानिनीं खड्गवतीं पश्यामः?

तरला— दैवं जानाति-न हि विश्वसिमः समरगतानाम्।

(कलावती दीर्घं निःश्वसिति)

तरला— अपि विदितं ते सखि!

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

कलावती—किमिति ?

तरला— श्रीमान् चोलनरेन्द्रः सिंहलान् यातीति ।

कलावती—किं वा करोमि मन्दभाग्या ?

तरला— वयमपि यामः । तत् वा प्रयत्नः सफलो भवेत् ।

कलावती—( क्षणं विचिन्त्य ) एवं वा भवेत् प्रियसखि ! परं कथ मावयोर्गमनं सम्भवति ?

तरला— नातिदुष्करं प्रियसखि ! तात एव एवं कुर्य्यात् । आवां वा यतावहे ।

कलावती—परंतु नगररक्षणे नियुक्तः सेनापतिः रक्षितुं शक्नुयात् वा उत्कलवलात् चोलराजधानीम्, अनवरतं कृष्णायाः सेतुवन्धं यावत् निरूढाः कलिङ्ग भटाः ।

तरला— के वा आवाम् अत्र, यद्भावि भवतु ।

( नेपथ्ये—वन्दे ब्रह्मसनातनमो

कलावती—त एव महात्मानः, गच्छ, अन्विष्य सम्भावयामः ।

( इति प्रस्थिते )

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

तृतीयाङ्के तृतीय दृश्यम्

स्थानं — — — ग्राम्यः पन्थाः

( दुग्धभारं वहन् प्रविशति गोपालः )

गोपालः— दुग्धं भोः दुग्धम् ।

( प्रविशतः सैनिकौ )

प्रथमः— भोः महाकुल ! किमिदं माहिषम् ?

गोपालः- एवम् ।

द्वितीयः- माहिषमपि वा पातव्यं—कफमेवाधिकं जनयति । न-
हि रे महाकुल !

गोपालः-- बलिन् ! नैवं, वयं प्रत्यहं प्रत्येकं कुम्भमितं पिबामः
कफमिति च न जानीमः ।

द्वितीयः— दावाग्निरिव वा भवेत् जाठराग्नि र्वनेचराणाम् ।

प्रथमः— ( सव्याजम् ) परन्तु माहिषं पयः स्वपरिमाणेन जलेन
मिश्रितं रुचये स्वास्थ्याय च भवति । अपि भद्र ! जल-
मत्रैव स्यात् ?

गोपालः- अस्मिन्नेव अपरस्मिन् भाण्डे वर्तते । अहं हि भाण्ड-
मितं दुग्धं विक्रीय तुलार्थं भाण्डेऽस्मिन् जलम्
आपूरयन्नस्मि ।

प्रथमः— अथैते संमिश्रय्य ददासि ? किन्तु निपुणेनैव तथा मिश्रणं

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

सम्भवति

गोपालः — वाढं, निपुणोऽहम् (इति सर्वमेव दुग्धं सर्वाभिरद्भिः मिश्रयितुमारभते, प्रथमः अन्तर्हसति)

द्वितीयः — धिगस्तु रे मुर्ख ! सर्वमेव दुग्धं जलीकरोषि? विरम विरम आगच्छ आवाभ्यां सह, भाण्डमूल्यमेव गृहाण ।

गोपालः — कुत्र गन्तव्यम् ?

प्रथमः — शिविरान्तिकं सेनाधिपतेः पुष्कराक्षस्य ।

गोपालः - किं स एवायं पूर्वमत्र शासकः ?

प्रथमः — अथ किम्, स इदानीं दक्षिणापथान् अभियान् अत्रास्ते ।

गोपालः - अस्मिन् महेन्द्रारण्ये अभियानाय उत्सुकान् सहकरोति वाढम् ।

प्रथमः — वाढं, परन्तु स्वेच्छया आगतानेव ।

गोपालः - इदमेव यथेष्टम् । किं वा युद्धेषु, विशेषतः अभियानेषु आवाहनं नाम कालिङ्गानाम् असद्ग्रामीणा अपि बहवो गच्छेयुः ।

द्वितियः — अपि आभीरपल्लीषु एवम् ?

गोपालः - किं भवान् वैदिशिकः ? भवतु वा आभीरपल्ली, तत्र महिषरक्षकाः वन्यैरेव योद्धुं समर्था न पुनर्मनुष्यैः । परन्तु ये कृषिकर्मणः राजानुजीविनश्च समयेषु शस्त्रैः शिक्षन्ते, ते तु बहवः सन्त्येव । चलतं शीघ्रं

शस्त्रशिक्षा

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

प्रचारयामि महेन्द्रवनेषु दक्षिणापथाभियानम् ।

प्रथमः—धन्योऽसि भो महाकुल ! कलिङ्गान् अधिवसन् गोपालोऽपि ।

द्वितीयः— तदागच्छ शिविरमेव गच्छामः ।

( इति प्रस्थिताः )

तृतीयाङ्के चतुर्थं दृश्यम्

स्थानम्..... अरण्यम् ।

( देव्याः समीपे मुक्तखड्गहस्तः दस्युपतिः दस्यवश्च, बलित्वेन बद्धः कश्चित् पुरुषश्च ( नरसिंहः )

पुरुषः— अरे पापाः ! किं मां दुःखस्थितं कपटेन बद्ध्वा एवं चेष्टध्वे ?

दस्युपतिः— हाः हाः !! किं वा चेष्टामहे । देव्या आनीतो भवान्

पुरुषः— एतं मुदां स्थानमेव नः । परन्तु प्रयच्छत मह्यम् अस्त्रं बहवो यूयं शक्ताश्चेत् बध्नीत ।

दस्युपतिः—हाः हाः !! किंवा वयमित्थं मूर्खाः बन्धादुन्मुच्य शस्त्रमपि तुभ्यं ददामहे ?

पुरुषः—किं वा भयं, वीराः यूयं सशस्त्राश्च ।

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

दस्युपतिः— परं को वा स्वानर्थं यत्नेन सम्पादयेत् ?

पुरुषः— परन्तु रे पाषण्ड ! मनुष्यमपि पशुमिव सावहेलं मार-
यतां वः नरकानां समाहारोऽपि न्यूनो भवति ।

दस्युपतिः—कथं पूजास्वपि एवं स्यात्?भवतु मापुनः प्रलप स्मर,
तवाभीष्ट देवताम् न विलम्बः सह्यते ।

पुरुषः— अरे इदानीमपि शस्त्रं मे देहि ।

दस्युपतिः— वृथा प्रलापाः नैव शोभन्ते । सज्जो भवान् ?

पुरुषः— ( स्वगतम् ) किं वा करोमि मन्द भाग्यः ( देवीमु-
द्दिश्य ) देवि ! शरणागत वत्सले ! यदि देवि ! त्रि-
भुवनजननी सैव त्वं मम माता, त्वमेव त्रायस्व
मां हतभाग्यम्, त्वामेव शरणं गतोस्मि ।

( इति नमति )

दस्युपतिः—वयस्याः देवीमभिमुखीकरोमि, सज्जीकुरुत बलिम् ।

( सज्जं बलिमभिलक्ष्य खड्गमुद्यम्य पठति )

रक्तबीजानां संहरणाय स्वजिह्वां विस्तारितवती, रक्तेषु
निजाभिवाञ्छितत्वं प्रकटीकरोषि । त्रिपुरमपि संहरन्ती
संहारेष्वेव रमसे, तद्देवि ! स्वीकुरुष्व दीनोपकल्पितं रक्त-
संहारं च ।

( इति हन्तुमुद्यतः, पुष्कराक्षस्य प्रविशतः खड्गेन

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

तस्य खड्ग भूमौ पतति )

( तूर्यं ध्वनयति प्रविशति सैनिकः )

पुष्कराक्षः— गच्छत बध्नीत पाषण्डान् ।

सैनिकः— यथा ज्ञापयति ( इति निष्क्रान्ताः )

पुष्कराक्षः—[ बन्धनमुन्मोच्य ] सौम्य ! अपि निष्प्रत्यूहो भवान् ?

पुरुषः— कामं लोकोत्तरेण श्रीमतां प्रतापेन ।

पुष्कराक्षः—न हि एवं, भद्र ! किमेतेषु अपि क्षुद्रेषु प्रतापस्य लोकोत्तरत्वं, परं मन्ये शस्त्रग्राही भवान् ।

पुरुषः— ( मुक्तः पुष्कराक्षस्य पादयोः पतित्वा उत्थाय च ) सेनापते ! अयमस्मि कालिङ्गः आन्ध्रान् गन्तुमुपक्रममाणः, पथि एभिर्गृहितोऽस्मि ।

पुष्कराक्षः— परं मां जानाति भवान् ?

पुरुषः— को वा शासनकर्तारं भवन्तं कलिङ्गेषु न जानीयात् अहं तु—

पुष्कराक्षः— किं वा विवक्षते आयुष्मान् ?

पुरुषः— किं न प्रत्यभिजानाति मामार्यः ?

पुष्कराक्षः—( निरीक्षते पुरुषः सलज्जं हसति ) अहो ! ( तमालिङ्ग्य ) अहो ! नरसिंहः स एव त्वं नरसिंहः, शिशुर्नरसिंहः ।

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

पुरुषः— स एवाहम् आर्य्य ! ( पुनः पादयोः पतति )

पुष्कराक्षः— [ उत्थाप्य] कथम् एवंविधोऽसि,क्वासौ विचित्रायाः अपि कनीयान् तन्मातुलपुत्रः शिशु नरसिंहः ?

पुरुषः— स एवायमार्य्य । भवत्प्रसादेन दक्षिणापथानपि अभियातुमुत्कण्ठितः ।

पुष्कराक्षः— अपि कालिङ्ग गुणान् वहसि गजचालनासु ?

पुरुषः— यत् किंचित् जानामि, एतदर्थं बहुधा सेवितः तत्र भवान् रणसिंहः ।

पुष्कराक्षः— स एव गजानां समरेषु अग्रेसरः महेन्द्रोपत्यकावासी उत्कलीयसेनानीषु अन्यतमः ।

पुरुषः— यथादिशन्ति भवन्तः ।

पुष्कराक्षः— तेन हि आयुष्मन् ! अग्रजां ते स्वभुजैरेव सन्तोषय, दक्षिणापथेषु गजवाहिन्यां अधिकृतो भवान्, परं आन्ध्रान् गच्छन् सिंहलान् अपि यातुं पारयसि ?

पुरुषः— किं वा न पारयामि भवदाज्ञया । यथेष्टं नियोजयतु ।

पुष्कराक्षः— आगच्छ आयुष्मन् ।

( इति प्रस्थितौ )

पटक्षेपः

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

चतुर्थोऽङ्कः.....पंचमं दृश्यम्

स्थानम्... ..... उद्यानम् ।

( उद्याने चिन्तिता दीर्घवेणी )

दीर्घवेणी— युद्धं युद्धं, तत्र महद्भिरुत्कलकेशरिभिर्युद्धं कीदृक् भवेत् ? अभिमततमं भवेत् । प्रियसख्या विचित्रया च युद्धं, रमणीयं भयङ्करं च भवेत्, न इदानीमपि तयोरेकेन अयुध्ये । परन्तु निकटायते, निकटतमं भवतु, प्रबलतमा हि वीराणां समबलेषु परस्परं जिगीषा

[ प्रविश्य प्रणम्य पद्मा ]

पद्मा— राजेन्द्रनन्दिनि ! एवं समबलेषु जिगीषा शोभते, परन्तु विचित्रा जिगीषति खड्गवतीम् ।

दीर्घवेणी—किमत्र विचित्रं, सा हि प्रियसखी विचित्रा ।

पद्मा— एवमपि भर्त्तृदारिके ! नैव सा स्पर्द्धते भर्त्तृदारिकया ।

दीर्घवेणी—पद्मे ! वीरासु न भर्त्तृदारिकात्वं तथा आद्रियते यथा वीरत्वम् ।

पद्मा— क्षमस्व, भर्त्तृदारिकापि तां बहुमानयति, धन्या सा प्रसन्नाः खलु महीयसां वृत्तयः स्वगुणै र्धन्यासि, परं तत्र भवान् ।

दीर्घवेणी—महानुत्कलकेशरी ।

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

पद्मा— स एव, आकृत्या वीरत्वेन च भर्त्तृदारिकाया अभिरूप-
एव।

दीर्घवेणी—अतएव शीघ्रं तेनैव युद्धमिच्छामि।

पद्मा— [सहासम्] भर्त्तृदारिके किं सर्वत्र युद्धमेव आशास्ते
भर्त्तृदारिका ?

दीर्घवेणी—किं वा पुनराशास्यते ?

पद्मा— किमिदं राजकुमारि ! न पुनर्वरयेत स्वयमेव महानुत्कल-
केशरी वीराग्रगण्यायाः सिंहलनरेन्द्रनन्दिन्याः प्रणयम्?

दीर्घवेणी— नैवं पद्मे ! न जानासि नारीणां वरणीयतमोऽपि स
भवान् न अस्मादृशीभिः सुलभः।

पद्मा— किमेवं भर्त्तृदारिके ! किं रूपतो गुणतोऽभिजनतोऽपि
न समाना भवती श्रीमदुद्योतस्य ?

दीर्घवेणी— किं वा रूपेण गुणैर्वा ? वैदिकानां वौद्धैः परिणयनं न
संभाव्यते, परन्तु स मम प्रियसख्याः कलावत्याः
प्रियतमः सम्माननीय एव मम।

( प्रविश्य सैनिकः )

सैनिकः— भर्त्तृदारिके ! कलिङ्गसेनाः सिंहलान् परितो युध्यन्ते।

दीर्घवेणी— सर्वतोऽपि कालिङ्गान् हनिष्यामः।

सैनिकः— तत्र भवती विचित्रा प्रतिज्ञातवती, अद्यैव अजेयपुर-
दुर्गं स्वायत्तीकरोमीति।

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

दीर्घवेणी— न पुनः सिंहलेषु सर्वाणि युद्धक्षेत्राणि समानि भवन्ति, सन्निवेशहीनयुद्धे जित्वा कथं व्यूढेऽपि अभिभवितुमिच्छन्ति ? तत्शीघ्रमभियामः ।

( इति प्रस्थिताः )

चतुर्थोऽङ्कः ..... द्वितीयदृश्यम्

स्थानम् ..... सभागृहम्

( आसीनौ माधववर्मा मन्त्री च )

माधवः— मन्त्रिन् ! परश्व एव सिंहलान् यामः ।

मन्त्री— यथाज्ञापयति देवः ।

माधवः— वत्सा कलावती यातुमिच्छति ।

मन्त्री— का हानिः, अपि च ।

माधवः—किं वा विवक्ष्यते ?

मन्त्री— एवं विज्ञापयामि देवपादान् सुचिरं मार्गयन् अहं कलावत्याः अनुरूपवरं श्रीमदुद्योतमेव निरचिनवम् ।

माधवः—परन्तु कथमेवं भविष्यति ? तस्मै एव वीर्य्यमत्ताय कालिङ्गाय स्वतनयां दास्यति चोलनरेन्द्रः ?

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

मन्त्री—किं वा अत्र असम्भवम्? देव! जयनशीला हि वीराणां गुण-
ज्ञानां सभाजनीया भवन्ति।

माधवः— परम्—

इदानीमेव गच्छामि यस्यारेर्नाशकारणात्।
स्वयमेव स्वतनयां तस्मै वा कथ मर्पये?

मन्त्री— यथा तेषां पक्षतः प्रस्तावो भवेत् तथा गतिव्ये।

माधवः— एवमपि विजिताय न प्रयच्छामि कलावतीम्।

मन्त्री— भवतु, सिंहलविजयिने दक्षिणापथेषु च अप्रतिहताय
तस्मै भर्तृदारिकां प्रयच्छतु देवः।

माधवः— कथं प्रस्तुतेऽपि युद्धे एवमाशङ्कनं सङ्गच्छेत?

मन्त्री— किं वा न सङ्गच्छेत, यदि श्रीमान् चोलानां नरेन्द्रः आज्ञा-
पयेत्?

माधवः— किमत्र भवान् अद्यैव कलिङ्गै र्योधनं स्थगयितव्यं म-
न्यते? न हि एवं सम्भवति। न सिंहलान्ध्रादिषु प्रिय-
सुहृत्सु अप्रत्ययो भवति चोलनरेन्द्रः।

मन्त्री— परन्तु—

माधवः— नैवपरं किंचित्, केशरि सदृशाः अनेके वराः स्वयंवर-
यन्ते कलावतीम्। न पुनरहं तेनैव मुखेन कालिङ्गान्
उपासितुमुत्सहे एवं भवदुपदेशं न निवारयामि।

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

गच्छामः सिंहलान् सबलाः । यदि तत्र विजयशालिनः स्युरुत्कलीयाः स्वयमेव उपहरामः उद्योताय कलादतीम्

मन्त्री— यथा रोचते देवेभ्यः.

( प्रविश्य सभ्रान्तः प्रहरी )

प्रहरी— देव ! आक्रान्ताः स्मः उत्कलीयैः राजधान्यामेव ।

माधवः— कथमित्थम् ?

प्रहरी— महदुत्कलबलम् आन्ध्रान् विजित्य आगतम् । तेन युध्यमानो वर्त्तते सेनापतिः सीमान्तेषु । अत्र च हठात् पूर्वमेव छद्मना स्थितैः कलिङ्गसैन्यैः युद्धम् आरब्धम् ।

मन्त्री— देव ! प्रथममेव एवम् अकथयम् देवपादान् ( क्रमशः "वर्द्धन्तां कालिङ्गाः ३" कोलाहलः वर्धते )

माधवः— अपि सज्जाः अस्माकं सैनिकाः ?

प्रहरी— अथ किम् ? दृढं युध्यन्ते चोलाः ।

माधवः—गच्छतु भवान्, श्रावय अस्मद्राज्ञां, निरा तयत कालिङ्गान् नितान्तं परिमिताः छद्मस्थिताः अत्र कालिङ्गाः ।

[ प्रविशति सलैन्यः पुष्कराक्षः ]

पुष्कराक्षः-परंतु राजन् न पुनरिदानीं तेषाम् अत्यल्पत्वम्, संमिलिता हि ते प्रभूतैर्बलिभिः स्वपक्षीयैः ।

माधवः— कस्त्वम् ?

पुष्कराक्षः— स एवाहं पुष्कराक्षः ।

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

माधवः— उत्कलेषु सैन्याध्यक्षः ?

पुष्कराक्षः—चोलेषु पुनः विजेता शासिता वाऽस्मि ।

माधवः— कः कोऽत्र भोः वक्षीत एनं वाचाटम् ।

पुष्कराक्षः—हाः हाः चोलेषु चक्रवर्त्तिन् नैकोऽपि अत्र भवच्छासनं निर्वोढुं क्षमते ।

माधवः— किमेवम् ?

पुष्कराक्षः—सम्यगिदानीं शान्ताः दक्षिणापथे महते उत्कलकेशरिणे द्रुह्यन्तो भवन्तः । वन्दिर्वर्तते भवतां सेनापतिः । सर्वे यूयमिह वन्दयः श्रीमदुद्योतदेवानां परिसरान् नेष्यन्ते ।

माधवः— कथमेवं भवतु ?

पुष्कराक्षः—ननु संपन्नमेव ।

( राजा मन्त्रिणं पश्यति )

मन्त्री— प्रिय एव नः श्रीमदुद्योतस्य सर्वत्र विजयः ।

पुष्कराक्षः—कथमेव पुनः प्रहसनमारभ्यते ?

मन्त्री— महाभाग ! किमत्र प्रहसनस्य बीजं, सत्यमेव चोलनरेन्द्राणां परमा मुदः ।

पुष्कराक्षः—परंतु किमत्र भवतां प्रस्तुते प्रतिविधेयम् ?

मन्त्री— किं वा अन्यत् देवपादैः सुनिश्चितामेव पद्धतिं भवानतुमन्यते, एवं विधास्यामः, एते सर्वे महान्तमुत्कलकेशरिणं सम्भावयितुमेव यास्यामः ।

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

( पुष्करांक्षः राजानं वीक्षते )

माधवः— एवं पुष्कराक्ष ! वीरत्वेन राजनीत्यादिभिश्च अतुलनीयः श्रीमदुद्योतः कस्य वा प्रियो न भवेत्, तिष्ठतु भवान् स्वपुरनिर्विशेषं चोलेन्द्रगृहेषु । समसेव परश्वः गच्छामः सिंहलान् ।

पुष्कराक्षः— यथादिशति महाराजः ।

( किंचिन्नम्रो भवति )

---

चतुर्थेऽङ्के तृतीयदृश्यम्

स्थानम् ... ... कक्षा ।

[ प्रविशति चिन्तितः सिंहलराजः ]

सिंहलराजः— सम्माननीयाः युद्धेषु उत्कलीयाः । कामं च वरणीयो महानुत्कलकेशरी, परन्तु योग्यतमोऽसौ प्रतिपक्षः सिंहलानाम् । स्थाने च प्रतिज्ञातवती वत्सा दीर्घवेणी । जयतु जयतु वत्सा ।

( प्रविश्य मन्त्री )

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

मन्त्री— देव ! जयत्येव वत्सा खड्गवती । दूरं हि प्रत्यावर्त्तिता-स्तया विचित्राया: सेनाः । अन्यतश्च कालिङ्गानामुप-द्रवाः शान्ताः ।

सिंहलराजः— अप्यनुभूता सिंहलानां बाहुशालिता शत्रुभिः ?

मन्त्री— एवं बहुधा अनुभावयिष्यते ।

सिंहलराजः — सेनापते ! किं वा व्यवस्यति वत्सा ?

सेनापतिः—उचितं यत् सिंहलेन्द्रनन्दिन्याः । प्रतिपक्षभयङ्करेण युद्धेन जयोऽस्याः क्रमशो वर्धते ।

सिंहलराजः— एवमस्तु आयुष्मती ।

सेनापतिः—देव ! अद्य पुनर्विचित्रया युध्यते भर्त्तृदारिका ।

सिंहलराजः— शङ्कास्थानमेव ।

सेनापतिः—न किमपि शङ्कनीयम् । इयं खलु पृथिव्यामपि वीराणां मूर्द्धन्या दीर्घवेणी ।

सिंहलराजः— परमुत्कण्ठते हृदयम् गच्छ त्वं, पुनः पुनरस्मान् गोचरयिष्यसि समराणामवस्थाः ।

सेनापतिः—यथादिशति देवः । ( इति प्रणम्य निष्क्रान्तः )

सिंहलराजः—मन्त्रिन् ! आवामपि अनन्तरकरणीयाय गच्छावः ।

मन्त्री— यथाज्ञापयन्ति प्रभवः ( इत्युभौ निष्क्रान्तौ )

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

चतुर्थोऽङ्कः ..... चतुर्थदृश्यम्

स्थानम् - - - - युद्धभूमिः ।

गीतम् ।

सैनिकाः — जयत जयत वीराः

जयत जयनशीलाः ।

ध्वनति विजयभेरी तनुत समरलीलाः । ध्रुवम् ।

रिपुकुलबल— दलनकुशल-

भुजबलमिह कलयत वराः

एत हे जयत जयत वीराः । २ ।

निजभुजबलदृप्ताः

परमधिपतिगुप्ताः

समुदितरय-- कृतरिपुजय

मपहतमल— मतिशयकराः,

एत हे. जयत जयत वीराः । २ ।

( यथार्हं गताः )

( प्रविशन् सिद्धवटुः—परितो विलोक्य )

इतो गच्छामि-इतो वा गच्छामि इतो वा, इतो वा ?

का वा इयं हतविधेर्घटना! क्व पुनरहं शिविरेषु सुभोज्यानि भुञ्जानः वर्त्तेय,न च तथाजातम् परं तु दुर्दैवेन समानीतः, समरभूमिम्,इतः-

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

स्ततो विचरन्नेव अत्रागतोस्मि, किं वा करोमि मन्दभाग्यः ?
यामि तावत् ( गच्छन् तूर्यध्वनिं श्रुत्वा निवृत्य )

नेतः नेतः इतस्तावद् गच्छामि । ( अन्यतो गच्छन् पुनः श्रुत्वा ) न वा अन्यत्र गच्छामि अत्रैव अद्य प्रेषितो भवामि यमराज्यं, शान्तं शान्तं प्रतिहतम् अमङ्गलं, नाहं यमस्य तत्पितुः तत्पितामहस्य वा राज्यं गन्तुमिच्छामि । अहमत्र श्रीमदुद्योतदेवैः सह चरन् यथेष्टं भुञ्जानः चिरं स्थास्यामि ।

( स्वशिरसि हस्तं दत्वा ) चिरं जीवामि, चिरं जीवामि, चिरं जीवामि ।

[ प्रविश्य उत्फुल्लसैनिकः ]

सैनिकः— (विहस्य) ब्रह्मन् ,न भवादृशा अत्र दृश्यन्ते । आगच्छतु भवान् शिविरं प्रापयामि ।

सिद्ध— चिरंजीव, विजयी भव, गच्छ तात ! अग्रतो गच्छ ।

( इत्युभौ निष्क्रान्तौ )

[ प्रविशति सैनिकैः सह दीर्घवेणी ]

दीर्घवेणी— उच्चैर्वदत वीराः वर्धन्तां वर्धन्तां सिंहलाः ।

सैनिकाः— वर्धन्तां वर्धन्तां सिंहलाः ।

दीर्घवेणी— अयि सिंहलानां वीरचूडामणयः ! न खलु पराजेतव्यं भवद्भिः,न हि पराजीयेत सिंहलीयः, कुत्र वा क्षुद्राणां

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

कालिङ्गानां निपुणता या हि भवतोऽपि निश्चेष्टीकुर्य्यात् इदानीमेव प्रतिहन्यन्ते कालिङ्गापसदाः । अद्यैव विजेतव्या तेषां परिचालिका विचित्रा, अद्य हि-सिंहलेन्द्रनन्दिनी न निर्जित्य विचित्रां शिविरं न प्रत्यावर्त्तेत, यथेष्टं भवद्भिर्हन्तव्याः कालिङ्गाः, पुनर्वदत वीराः वर्धन्तां सिंहलाः वर्द्धन्तां सिंहलानाम् अधीश्वराः ।

सैनिकाः— वर्धन्तां सिंहलाः, वर्धन्तां सिंहलानाम् अधीश्वराः । वर्धन्तां सेनाधिनेत्री भर्त्तृदारिका दीर्घवेणी ।

( सर्वे प्रस्थिताः )

विचित्रा— कालिङ्गवीराः, प्रकाशयत सम्प्रति यथेष्टं स्वभुजेषु संचितानि वीर्य्याणि न खलु युष्माकं प्रतिज्ञातवतां सिंहलविजयः किंचित्करो भवति ! न हि केशरिभिः मृगयूथजय दुष्करो भवति ! वीराः ! स्थापयत स्वयशः-पताकां सिंहलेषु ! योधयत उत्कलीयानामेव सदृशं युद्धं, वदत वीराः वर्धन्तां वर्धन्तां कालिङ्गाः श्रीमदुद्योत देवाः ।

सैनिकाः—वर्धन्तां कालिङ्गाः, वर्धन्तां श्रीमदुद्योत देवाः, वर्धन्तां सेनापरिचालिका विचित्रा ।

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

(सर्वे प्रस्तिताः, ततः सैनिकाः युध्यमानाः प्रविश्य यान्ति, ततः विपरीताभ्यां दिग्भ्यां मागते विचित्रादीर्घवेण्यौ)

विचित्रा— वर्धसे राजनन्दिनि ! दिष्ट्या दृष्टासि ।

दीर्घवेणी—एवं प्रियसखि ! प्रियसखीं विचित्रामेव लब्ध्वा न वर्धे ?

विचित्रा— विचित्रां समरे लब्धवती, प्रतिपक्षे प्रयुक्तः वर्धन-शब्दः वृद्ध्यर्थान्तरमेवउपस्थापयति ।

दीर्घवेणी— न तु दीर्घवेण्यां प्रयुक्तः ।

विचित्रा— एवं वा मन्यन्तां नाम सिंहलीयाः ।

दीर्घवेणी— न हि कालिङ्गानामिव मनोरथाः सिंहलानां मनसि एव उपशाम्येयुः ।

विचित्रा— कथं सिंहलानपि जेष्यतां कालिङ्गानां मनोरथानां मनस्येव उपशमनम् ।

दीर्घवेणी— परंतु कालिङ्गाः स्वोच्छेदार्थमेव सिंहलानागताः ।

विचित्रा— कथमेवं मनुषे दुर्गर्वेण ।

दीर्घवेणी— दुर्गर्वं हि भवतीनामेव प्रकाशते, अतः शिष्यन्ते ।

विचित्रा— कथं विचित्रामपि शासितुमीहसे ?

दीर्घवेणी— एषा प्रत्यक्षमेव, तदेहि निरूपयावः ।

(इति खड्गमाकर्षति)

विचित्रा—बाढम् । (इति युध्येते)

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

( विचित्राया: खड्गं भूमौ पतति )

दीर्घवेणी— पुनर्गृह्णातु प्रियसखी शस्त्रम् ।

विचित्रा— एवं भवतु प्रियसखि !

( पुनर्युध्येते, दीर्घवेण्याः करवाल भज्यते )

विचित्रा— अन्यदपि धारयितुमर्हति राजनन्दिनि ! परं संप्रति वा स्वेच्छया अन्यदा वा धारयतु ।

दीर्घवेणी— प्रियसखि ! एवं, गृह्णाम्येव त्वयि निश्चितं शस्त्रम् । न पुनरेवमेव सन्तुष्टा भवति दीर्घवेणी, परन्तु प्रियसखि ! योद्धव्यमेव मया श्रीमदुद्योतेन, ततः परं त्वां विनयामि ।

विचित्रा— नैव संभाव्यते दीर्घवेणि ! न पुनः शस्त्रं गृह्णाति देवः मदनुरोधेन यावत् शस्त्रवती विचित्रा ।

दीर्घवेणी— नैषा प्रतिज्ञा पूर्यते भवत्याः । अवश्यं शीघ्रं ग्राहयिष्यामि शस्त्रं भवतीनां चक्रवर्त्तिनम् ।

सिंहल सैनिकः— भर्त्तृदारिके ! सूर्योऽस्तं गतः ।

दीर्घवेणी— प्रियसखि ! निवर्त्तय स्वबलम्, श्वः पुनः प्रेक्षितव्या प्रियसखी ।

विचित्रा— एवमस्तु प्रियसखि !

( उभे स्वसैनिकैः सह विपरीतदिशौ गच्छतः )

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

पञ्चमोऽङ्कः प्रथमदृश्यम्

स्थानम् ..... शिविरांशः

( प्रविश्यति राजा )

राजा— कामं मनोहराः सिंहलेषु समरचर्चाः, धन्याः सिंहलानां सेनाः। नैव पश्चात् भज्यन्ते धन्यतमा च तासां नेत्री दीर्घवेणी, या हि अस्मानेव समयोधान् मन्यते। परं सफलीकर्त्तव्या मया विचित्रायाः पार्थना, न पुनः सिंहलयुद्धेषु शस्त्रं गृह्णामि।

उत्कलसैनिकः— ( प्रविश्य ) देव ! अद्य सुमहद् बलं सिंहलानां युध्यते।

राजा— प्रियं नः प्रियम्, अपि सहन्ते भवन्तः ?

सैनिकः— कुतः कालिङ्गानां शत्रुषु मर्षणं नाम, देवपादसेवकानामुचितमेव कर्म प्रारब्धमुत्कलीयैः।

राजा— गच्छ ज्ञापय विचित्रामस्मदाशिषः।

( सैनिकः प्रणम्य गतः )

राजा— श्लाघ्या खलु इयमस्माकं विचित्रा।

[ उत्कलदूतः प्रविश्य प्रणमति ]

राजा— कुत आगतः ?

दूतः— धनुष्कोटितः तत्र भवता सेनापतिना प्रेषितोस्मि।

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

राजा — अत्यन्तं निकटं समागतः सः ।

दूतः— देव ! शीघ्रमन् प्रविशेयुः उत्कलवीराः । निवेदितं हि देव-पादेषु सेनापतिना आन्ध्रकर्णाटादयो विनीताः । अवशिष्टानप्यचिरं विनीय सिंहलेषु एव देवपादान् पश्यामीति ।

राजा— एवं भवतु समर्थो हि पुष्कराक्षः ।

( प्रविशति सिद्धवटुः )

दूतः— अपरं च सस्मितं निवेदयति—एकं त्रिभुवनदुर्लभं सुरत्नं चोलेभ्यो देवस्य उपनयामीति ।

राजा— ( स्मित्वा ) एव मुपनयतु तावत्, विश्राम्यतु भवान् ।

( दूतः प्रणम्य निष्क्रान्तः )

सिद्ध— भो वयस्य ! पुष्कराक्षकल्पितामुपायनां जानामि

राजा— कथं स्वार्थेऽपि स्त्रीप्रत्ययं करोषि ?

सिद्ध— न हि न हि स्त्रीरूपार्थे एव उपायनमुपायनां वदामि । तत्तु उपायनं तत्रभवती कलावती ।

राजा— कथं ज्ञातं त्वया ?

सिद्ध— भो एव बृहस्पतेरपि अधिकोऽसि । नैव चेत् किं वान्यत् । त्रिभुवनदुर्लभ रत्नमिति व्यपदिश्येत ! वयस्य ! गाढं कमनीया तत्रभवती कलावती ।

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

राजा— सारज्ञोऽसि भवान् ।

रूपं लोकत्रितयजनुषां लोचनैः पानयोग्यं
पारे वाचां खलु गुणगणः शास्त्रशुद्धा मनीषा ।
चोलेन्द्राणां विमलविमले सत्कुले च प्रसूतिः ।
कान् वा हेतून् न वहति सखे ! चोलराजेन्द्र कन्या ?

उत्कृष्टसैनिकः— ( प्रविश्य ) देव ! सिंहलसेनापतिना स्वकौशलेन दूरं नीता युध्यमाना कुमारी विचित्रा । इतः पुनः दीर्घवेणी प्रचण्डं युध्यते ।

राजा—अस्मत्सैन्याध्यक्षैः सावधानं योद्धव्यम् ।

( सैनिकः प्रस्थितः )

राजा—सत्यं प्रशंसास्थानमेव दीर्घवेणी ।

सिद्ध—परं श्यामलापि सा परमसुन्दरी भवति लावण्येन ।

राजा—यथार्थज्ञोऽसि ।

सिद्ध—परन्तु—

राजा—किं वदसि ?

सिद्ध—अनुरक्ता इव दृश्यते सा वयस्ये

राजा—तत्तिष्ठतु वयस्य ! न पुनरुद्योतः स्वधर्मपत्न्याः सपत्नीं चिन्तयितुमिच्छति ।

सिद्ध—किमेवं न किं राजानः बहवरोधा भवन्ति ?-

( प्रविशति सम्भ्रान्तः सैनिकः )

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

सैनिकः—देव ! सर्वत्रैव हि दीर्घवेण्या गतिः अप्रतिहता भवति ।
न कोऽपि अस्मासु प्रतियोद्धा तस्या दृश्यते ।

राजा—कथम् एवम् ? विचित्रे ! नात्रभवती शस्त्रधारिणी वर्त्तते
न पुनर्दीर्घवेणी अद्य क्षाम्यति । अतः शस्त्रं
गृह्णाति उद्योतः ।

( वद्धन्तां सिंहलाः ३ इति कोलाहलः निकटायते )

सैनिकः—देव ! एते अग्रेसराः सिंहलाः जयमुद्घोषयन्ति ।

राजा—एवं हि भद्र ! भवन्तोऽपि उत्कलानां विजयमुद्घोष-
यन्तु । एष इदानीं विनयामि सिंहलराजसुताम् ।

( इति प्रस्थितः, तत्पश्चात् सैनिकः )

सिद्ध— ओः एवमेव युद्धेषु घटनाः संघटन्ते परन्तु प्रियव-
यस्यस्य युद्धं दर्शनयोग्यमेव । गच्छामि । अये !
विनश्यतु युद्धं, किं वा मम महाब्राह्मणस्य युद्धे
प्रयोजनम्, तत्रैव गच्छामि सर्वेषामपि परममभि-
गन्तव्यम्, परं च सुबुद्धिना सर्वदा उपास्यं श्रीमत्
महानन्दं यामि यामि ।

[ अभिनीय द्रुतं गतः ]

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

पञ्चमेऽङ्के द्वितीयदृश्यम्

स्थानम् ... ... युद्धक्षेत्रम्

[विचित्रा ससैन्या, सिंहलसेनापतिश्च ससैन्यो विपरीताभ्यां दिग्भ्यामागतौ]

विचित्रा—अयं सिंहलानां सेनापतिः।

शार्दूलसिंहः—अहो! त्वमेव सा। चिराद्दृष्टासि समरभूम्याम्।

(इति खड्गमाकृष्टुमिच्छति)

विचित्रा—सेनापते! न पुनरिदानीं युद्धस्यावसरः। सम्पूर्णं पराजिताः सिंहलाः।

शार्दूलाक्षः—कथं जीवत्यपि शार्दूलाक्षे एवं स्यात्?

विचित्रा—अभवदेव।

शार्दूलाक्षः—बालिके! अति हि नाम प्रगल्भसे। (इति खड्गं पुनराकर्षति)

विचित्रा—(स्मित्वा) नात्रभवतः कश्चिदेकोऽपि सहायः।

शार्दूलाक्षः—सिंहलवीरा! जागृत जागृत।

विचित्रा—परन्तु नात्र एकोऽपि सिंहलीयः।

शार्दूलाक्षः—बुद्धिशालिनी भवती। परन्तु जीवति शार्दूलः सिंहलानां सेनापतिः। विनैव युद्धं न तं भवती बन्दीकर्तुं शक्नोति।

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

विचित्रा—सेनापते ! यदि भवान् विचित्रया युद्धमिच्छति तत्पुनः कदापि वा स्यात् । परन्तु इदानीं वन्दिना त्वया सह कथमहं योद्धुमीहे ?

शार्दूलाक्षः—धिक् नैवं नैवं भवति । युध्यस्व । ( आक्रामति ) विचित्रा खड्गमाकृष्य युध्यते । विचित्रायाः खड्गाघातेन शार्दूलखड्गस्य दूरेपतनम् । तत्क्षणमेव सैनिकास्तं वन्दीकुर्वन्ति । )

विचित्रा—सिंहलसेनापते ! स्वीकृतात्रभवता कालिङ्गानां लशालिता ।

शार्दूलाक्षः—किमत्र बलस्य प्रकाशनम् । अनेकेषु युद्धेषु जयन्ति पराजीयन्ते च वीरा । परन्तु अद्यैव सिंहलान् न जितवती भवती । वियोजय वा प्राणान् शार्दूलस्य , न पुनः सिंहलेषु न सन्ति एतादृशाः ।

विचित्रा—न प्राणदण्डमर्हति भवान् । न हि युद्धे वन्दीकृत्य घ्नन्ति औत्कलाः , युद्धान्तमेव युद्धे वन्दीनां वन्दित्वम् परमत्रभवन्तमिहैव मोचयामि । सफलीभवतु भवतः विचित्रया युयुत्सा । त्यजत भद्राः (सैनिका. त्यजन्ति)

शार्दूलाक्षः—भवतु कालिङ्गानां नेत्रि ! एवं भवतु अचिरादेव पुनः पश्यामि भवतीम् ( इति प्रस्थितः )

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

विचित्रा—भटाः, गच्छत, श्रीमदुद्योतपादान् उपगन्तुं सज्जीभवत ( सैनिकाः निष्क्रान्ताः )

( प्रविशति जटावान् पुष्कराक्षः )

विचित्रा—( निरीक्ष्य ) कथं भवानेव ( इति पादयोः पतति )

पुष्कराक्षः—उत्तिष्ट आयुष्मति ! सौभाग्यवती भव (सा उत्तिष्ठति) कथं हठात् प्रत्यभिज्ञातोस्मि भवत्या ?

विचित्रा—आर्य ! सैव कनिष्ठास्मि ते विचित्रा ।

पुष्कराक्षः—गुणैः पुनर्ज्येष्ठासि ।

विचित्रा—( नमस्कृत्य ) मा मा एवं महाभाग ! पुष्कराक्षमपि कदा गुणैरतिवर्त्तेत विचित्रेति असंभवमेव । परं कथमत्र एवं विचरति भवान्, कदा वा आयातः ?

पुष्कराक्षः—अद्यैवात्र उपस्थिताः वयम् किमेवं विचरणे पुष्कराक्षस्यापि किमपि शङ्कसे ?

विचित्रा—परं तु शत्रुराज्यमेव ।

पुष्कराक्षः—( स्मित्वा ) इदानीं पुनः मित्रैः परिवृतोस्मि जातः ।

विचित्रा— अपि क्षेमवती प्रियसखी कलावती ?

पुष्कराक्षः—बाढमस्माभिः सह सिंहलान् प्रविष्टा ।

विचित्रा—कथमेवम् ?

पुष्कराक्षः—परन्तु शापितासि, नेदानीं देवस्य मदागमनं तेषां च वक्तव्यं भवत्या ।

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

विचित्रा—किं वा शपथेन ? किं त्वदादेशमपि पूर्वं लङ्घितवती क्वापि विचित्रा ?

पुष्कराक्षः— परन्तु नारीषु खलु जाता भवती।

विचित्रा—यथा पुरुषा एव परं विश्वासनीया इत्युक्तं भवति।

पुष्कराक्षः – किमिदं न सत्यम् ?

विचित्रा—इदं चेत् सत्यं ? रात्रावपि ईक्षेरन् काकादयः।

पुष्कराक्षः— वक्तुं कुशला एव भवत्यः।

विचित्रा— न आचरितुम् ?

पुष्कराक्षः—( सस्पृहं मन्थरं पश्यन् ) विचित्रे ! अपि अस्य ... विश्वासः ... चिरात् संचितः ... सफलतां यायात्।

विचित्रा—न भवद्विधा असदृशं विश्वसन्ति।

( सलज्जम् अञ्जलीकृत्य ) न पुनः संप्रति एवंविधः प्रसङ्गः शोभते।

पुष्कराक्षः—अचिरमेव अवस्था विबुध्यति।

वीचत्रा—एवं भूयात्।

पुष्कराक्षः—भवति ! गच्छामि।

( विचित्रा अञ्जलिं बध्नाति, स गतः )

विचित्रा—इतः क्षिप्रतरमेव पराजयेम सिंहलान्, क्षिप्रतरमुपस्थातव्यः श्रीमान् महाराजः.

पटपतनम्

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

स्थानम् ..... कक्षा ।

( उपविष्टा कलावती, तिष्ठन्ती तरला )

तरलायाः गीतम् —

सखि ! मधुरमधुरं तव शुभमुखं
विकसितजलजातं
अयि सुरभितपरिपूतं
विलोकन पर जन मनोहर-
विलसित मनिजातम् ।
विकसतु परमुत्तरमुत्तरं
एवमभिमतं तनोतु सुचिरम्
अनुविकसनमुदमुपयातु
चिरमनुरागिप्रियतमवित्तम् ।

तरला— सखि ! प्राप्ता वयम् ।

कलावती—जानामि सखि ! सिंहलान् प्राप्ताः ।

तरला— ( हसित्वा ) अहमपि इदमेव भणामि ।

कलावती—किमस्ति किमपि प्रयोजनं पुनरुक्तेः ।

तरला— प्रियेषु प्रियनिवेदनमेव ।

कलावती— घोरतरं युध्यमानायामपि प्रियसख्यां दीर्घवेण्यां प्रियसख्यां विचित्रायां च को वास्माकं सिंहलानेत्य आनन्दः ।

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

तरला— सर्वं शुभाय एव भवेत्। परं सावधाना भवतु भर्तृ-
दारिका।

कलावती— कस्मात् पुनरहं सावधाना स्याम् ?

( तरला नर्म्म हसति )

कलावती— ( स्वगतम् ) सत्यमेव वदति प्रियसखी । असावधा-
नया पुनः प्रकाश्येत नारीणां लघुता ( प्रकाशम् )
अपि सखि ! प्रियसखीं विचित्रामिह पश्येयम् ?

तरला— अस्मदागमनं श्रुत्वा आगच्छेद् वा प्रियसखी ।

कलावती— काममागच्छतु , एहि एहि प्रियसखि विचित्रे !

( प्रविशति विचित्रा )

विचित्रा— आज्ञाकरीयं विचित्रा प्रियसख्याः ।

कलावती ( उत्थाय तामालिङ्ग्य ) प्रियसखि ! सत्यं चिरमायु-
ष्मत्यसि । स्मरणमात्रेणैव उपस्थितवती ।

विचित्रा—प्रियसखि ! न केवलं स्मृताहम्, परंतु आहूता ।

कलावती—एवमेव प्रियसखि ! ( पुनरालिङ्गति )

विचित्रा— परन्तु श्व एत्र समापयिष्यते युद्धं सिंहलेषु, द्वावपि-
पक्षौ एवं निश्चितवन्तौ ।

कलावती—परं प्रियसखि ! युवयोर्युद्धं सम्भाव्य नितरामाकुला
अस्मि ।

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

विचित्रा— एवम्, प्रियसखि ! का वा विधेरभिलषितमनुमिनुयात् ?

कलावती— ( दीर्घं निःश्वसिति )

विचित्रा— ( स्मित्वा ) राजेन्द्रनन्दिनि ! अन्यदपि प्रजानां भागधेयं शीघ्रमेव सम्भाव्यते।

तरला— शुभं ते वचनं भूयात् प्रियसखि ! अवश्यमेवं फलतु ।

कलावती—तरलिके ! कोऽयमत्रभवत्योरेवंविचारस्य अवकाशः ? ( विचित्राम् ) प्रियसखि ! किं वा परिणमेत् ?

विचित्रा—(तामालभ्य) किमेवं सौभाग्यवति ! सर्वतः शुभं भवेत्।

कलावती—( तामाश्लिष्टा ) दुष्करं वर्त्तते प्रियसखि !

इतः संरभमाधत्ते श्रीमानुत्कलकेशरी
ततः प्रतिज्ञातवती दीर्घवेणी ह्यमर्षणा।

पटक्षेपः

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

पञ्चमोऽङ्कः चतुर्थदृश्यम्

स्थानम् ... ... राजपथः ।

[ प्रविशति संभ्रान्तः सिंहलसैनिकः ]

सैनिकः—न मया अत्यन्तं वृद्धेनापि दृष्टपूर्वम् एतादृशं युद्धम् न पुनः भाविनि द्रष्टुं सम्भाव्यते । अद्य पुनर्न जाने किं-वा भवतीति ।

[ प्रविशति द्वितीयः सैनिकः ] किं करोमि मन्दभाग्यः ? किं वा भवति भाग्येषु सिंहलानाम् ।

प्रथमः— किमेवं भद्र !

द्वितीयः— किं वा ब्रवीतु हतभाग्यः । बन्दीकृतो देवः उत्कलैः ।

प्रथमः— हा हा ! कथमित्थं जातमपि ज्ञातवतीदं भर्तृदारिका ।

द्वितीयः— न हि न हि ! तस्याः इदानीं विचित्रया घोरतरं युध्य-मानायाः कोऽपि समयः अतीतः, सर्वेऽपि चित्रिता इव तदेव पश्यन्ति, किं वा भवेत् ।

प्रथमः— शुभमेव भूयात्, गच्छ वयमपि नयने सफलीकुर्मः ।

द्वितीयः— एवम्, गच्छ ।

( इति प्रस्थितौ )

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

पञ्चमेऽङ्के  पञ्चमदृश्यम्

स्थानं ..... युद्ध क्षेत्रम्

युध्यमाने विचित्रादीर्घवेण्यौ पटोत्तलनाव्यवहितं दीर्घवेणी पतति, विचित्रा तूर्य्यध्वन्यनन्तरं शस्त्रं संहृत्य तदन्तिके उपविष्टा )

विचित्रा — भर्तृदारिके ! - -- -

दीर्घवेणी— अतः परमपि मां शत्रुं मनुषे, किं करोमि मन्दभाग्या इदानीं प्रियसख्या अपि भर्तृदारिका संवृत्ता ।

विचित्रा— न हि नह्येवं प्रियसखि ! नेमां तथाविधां मन्यस्व । क्षमस्व प्रियसखि ! ( अञ्जलिं बध्नाति )

दीर्घवेणी—( ताम् आलम्ब्य) प्रियसखि ! किं वा अत्र क्षमणीयम् । वीराणामेव पद्धतिं गतास्मि । पूरितमभीष्टतमं केशरिभिः युद्धम् ।

विचित्रा— प्रियसखि ! प्रियसख्या एव प्रियसखी निहन्यते कोऽयं युध्यमानानां कठोरः समाचारः ( रोदिति )

दीर्घवेणी— अयि ! किं वा रोदनेन । न हि प्रियसख्या वीरमरणेन प्रियसख्याः विशेषतो विचित्रायाः रोदनावसरः ।

( प्रविश्य ) कलावती— किन्तु कलावत्या अपारोऽयं रोदनावसरः किमिदं प्रियसखि ! ( इति तस्याः समीपे उपविश्य तां लालयति )

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

दीर्घवेणी— प्रियसखि ! महाप्रयाणात् पूर्वं प्रियसखीदर्शनेन परमानन्दस्य एव अवसरः ।

कलावती— अहो दीर्घवेणि ! किमिदम् ? ( स्फुटं रोदिति )

( विचित्रा वाष्पमुत्सृजति )

दीर्घवेणी— ( कलावतीमुपश्लिष्य ) प्रियसखि ! निश्चिते हि मरणे न तावत् निरानन्दः शोभते ।

विचित्रा— प्रियसखि ! कथमानन्दावः ? ( नम्रं रोदिति )

दीर्घवेणी— प्रियसखि विचित्रे ! एवं विज्ञापयितव्यः सः भवान् उत्कलकेशरी—जन्मान्तरेऽपि दीर्घवेणी तमेव युद्धेषु प्रतिपक्षत्वेन लभेत । एषा पुनः सिंहलान् अस्वतन्त्रानेव पश्यन्ती प्राणान् त्यजामि ।

राजा— देवि ! देवि ! न भवादृश्यः स्वदेशस्य अस्वातन्त्र्यं द्रष्टुमर्हन्ति । स्वतन्त्राः सिंहलाः, मुक्तः स भवान् सिंहलेन्द्रः ।

( प्रविश्य ) चित्रकेयूरः— वीर ! किं वा मुक्तेन स्वतन्त्रेण वा । एषवत्सामनुगच्छामि । वत्से ! वत्से ! (इति तस्याः अङ्के पतति, कलावती उत्थापयति, विचित्रा किंचित् दूरं तिष्ठति )

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

चित्रकेयूरः—वेणि ! वेणि ! किं करोमि मन्दभाग्यः ? हा हत-विधे ! ( तामालिङ्ग्य रोदिति )

माधवधर्मा—( प्रविश्य ) मित्र ! मित्र ! अलमतिशयितेन शोकावेगेन । दीर्घतमेन यशसा चिरायुष्मती वत्सा खड्गवती ।

दीर्घवेणी—सत्यमाह पितृव्यः । तात ! उत्तिष्ठ । त्वत्पादपङ्कजमेव अवलम्ब्य त्यजामि पृथिवीम् । (चित्रकेयूरः उच्चैः रोदिति )

दीर्घवेणी—उत्तिष्ठ तात ! करणीयमत् बहु विद्यते । परं निकटायते समयः ।

चित्रकेयूरः—एष सज्जोऽस्मि वज्रमयः । (कथञ्चिदुत्थाय दीर्घवेण्याः शिरोपान्तं तिष्ठति । सा तत्पादयुगलमवलम्बते । )

चित्रकेयूरः—अहो कथं सहे मन्दभाग्यः दीर्घवेण्या अपि—( इति रोदिति । सर्वे बाष्पमुत्सृजन्ति । )

दीर्घवेणी—तात ! ममायमन्तिमोऽनुरोधः । न पुनः शोचय दीर्घवेणीम् । दीर्घवेण्या अपि अधिकां स्नेहमयीं प्रियसखीं विचित्रां स्वतनयां स्वीकुरुष्व । (विचित्रां प्रति ) एहि प्रियसखि ! पितुरङ्के भव ।

चित्रकेयूरः—एहि एहि वत्से ! (अग्रेसरीभवति ।)

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

विचित्रा—( तस्य पादयोः पतति। स तामुत्थाप्य आलिङ्गति। सा च सलज्जं तस्य दक्षिणतः तिष्ठति। प्रविशति पुष्कराक्षः )

पुष्कराक्षः—जयतु जयतु सम्राट् कलिङ्गानाम्।

राजा—एहि वयस्य! आलिङ्गय। ( आलिङ्गति )

दीर्घवेणी—तात! न विलम्बं सहे। आगतस्तव प्रियो जामाता अत्रभवान् पुष्कराक्षः। समर्पय मत्सम्मुखे एव त्वां तनयामस्मै।

विचित्रा—प्रियसखि! ( तामवलोकते )

दीर्घवेणी—भवतु। क्षणं विलम्बयतु तातः। (चोलेन्द्रं प्रति) पितृव्य! क्षमस्व। किमपि यथेष्टमाचरामि! [कलावतीं प्रति] प्रियसखि! गच्छ त्वं पितुरन्तिकम्। ( सा तथा करोति )

दीर्घवेणी—( राजानं प्रति ) महाभागाः! न वा रक्ष्यते दीर्घवेण्या अनुरोधः?

राजा—किमेवं राजेन्द्रनन्दिनि! आज्ञापय यथेष्टम्।

दीर्घवेणी—महात्मन्! अङ्गीकुरुष्व त्रिभुवनमहनीयरूपगुणां प्रियसखीं कलाकेलिम्। ( चोलेन्द्रं प्रति ) पितृव्य! कृतार्थय दीर्घवेणीम्।

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

माधवः—वत्स ! शुभमभीष्टं तव सिध्यतु । [ कलावतीं राज्ञे समर्पयति, स गृह्णाति स्ववामे स्थापयति, उभौ सर्वान् नमतः )

दीर्घवेणी—( तौ दीर्घं निर्वर्ण्य सिंहलेन्द्रं प्रति ) तात ! इदानीं मन्दभागिन्या अवसरः ।

चित्रकेयूरः—वत्से ! एवं भवतु । ( तां तस्मै समर्पयति तावपि तथाकरणानन्तरं शिरसी किंचिन्नमयतः )

दीर्घवेणी—तात ! इदानीमस्मि सर्वाभीष्टानां सिद्धिभिः कृतार्था । नेपथ्ये "वन्दे ब्रह्म" इति गायन् प्रविशति सन्यासी सर्वे नमन्ति )

सन्यासी—(दीर्घवेणीं निरीक्ष्य) अये सिंहलेन्द्रनन्दिनि ! किमिदानीमत्यन्तं ते बाधा ?

दीर्घवेणी—( नमस्कृत्य ) देव ! का वात्र बाधा ? महाप्रयाणारम्भे हि भवतां दर्शनं परमानन्दाय एव कल्पते ।

सन्यासी—( पुनः क्षणं निरीक्ष्य ) नहि नहि एवम् आयुष्मति ! न तव इदानीं मृत्युयोगः । एवमुल्लाघयामि । (गत्वा कमण्डलूदकं सेचयित्वा किंचिदभिमन्त्र्य उत्थापयति सा उत्थाय तस्य पादयोः पतति )

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

सन्यासी--वत्से ! उत्तिष्ठ सम्भावय अत्रभवन्तं पितरम् ।

(दीर्घवेणी आलिङ्गति, सर्वे आनन्दं नाटयन्ति)

विचित्रा—आर्ये ! आर्ये ! क्षमस्व (दीर्घवेण्याः पादयोः पतति सा तामुत्थाप्य आलिङ्गति)

कलावती—प्रियसख्यौ एतं दृढमालिङ्गतं माम् ।

(इति अग्रेसरीभवति । तिसृणामालिङ्गनम्)

यवनिकापातः

# समाप्तम्

ब्रह्मपुरस्थशिरोमणिमुद्रालये श्रीअनन्ततृपाठिशर्मणा मुद्रयित्वा प्रकाशितम् ।

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

# शुद्धिपत्रम्

अभिमते

| पत्रम् | पङ्क्तिः | अशुद्धम् | शुद्धम् |
|---|---|---|---|
| १ | १ | उन्मादकारी | उन्मोदकारी |
| १ | ३ | श्राव्य | श्रव्य |
| ,, | ८ | तादृशं | तादृश |
| ,, | ११ | उत्पाटय | उत्पादय |
| ,, | १३ | पाश्चात्येषु | पाश्चात्येषु |
| ,, | १४ | पौरस्येषु | पौरस्त्येषु |
| २ | १ | सात्विक | सात्त्विक |
| ,, | ८ | कलानुवर्त्तिनी | कालानुवर्त्तिनी |
| ,, | १८ | विराजयिष्यते | विराजिष्यते |
| ३ | २ | वद्या | वन्द्या |
| ,, | १८ | लेभे | लब्धवान् |
| ,, | १९ | सरसता च | सरसता |
| ४ | ११ | वर्जनं | व्यवहरणं |
| ,, | ,, | कृतम् | न कृतम् |
| ,, | ,, | नियन्त्रण वस्तुविभागे | शिल्पे वाणिज्ये च |
| ५ | १४ | इस्यनेन | इत्यनेन |

नाटके

| | | | |
|---|---|---|---|
| ५ | ६ | संमाननाय | संमानयेयम् |
| ७ | ९ | उन्कल | उत्कल |
| ,, | १३ | द्रत्य | इत्य |
| ९ | २ | प्रभावोज्त्रला | प्रभावोज्ज्वला |
| ९ | २३ | तथा | ज़नान्तिकम् |
| १० | ,, | एकान्त | एकान्तं |

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

| पत्रम् | पङ्क्तिः | अशुद्धम् | शुद्धम् |
|---|---|---|---|
| ,, | १९ | संहरणीयस्य | संहरणस्य |
| १२ | ७ | आत्रैव | अत्रैव |
| १३ | ३ | पुख्यात | प्रख्यात |
| १५ | ७ | उपहारामि | उपहरामि |
| ,, | १८ | पर्याकृतां | पर्याकुलितां |
| १७ | १८ | दर्दूराणा | दर्दुराणा |
| २० | ७ | चंक्रमन्ते | चक्रम्यन्ते |
| २२ | १४ | शासनाक्षरं | शासनाक्षरैः |
| २२ | २१ | अचिरेणेव | अचिरेणैव |
| २४ | ६ | सिंहलात् | सिंहलान् |
| २७ | ११ | इति | इति पीत्वा |
| ,, | १३ | जगत्रये | जगत्त्रये |
| २९ | १४ | रक्त न | रक्तेन |
| ३५ | ५ | मामेवं | मामेवं |
| ,, | १५ | प्रियसख ! | प्रियसखि ! |
| ३६ | ७ | सामाधि: | समाधिः |
| ,, | १३ | तदन्तिकमुपनयति | तदन्तिकं नयति |
| ३७ | ७ | जालयित्वा | जलयित्वा |
| ३७ | २ | भवत्या | अत्रभवत्या |
| ३८ | ८ | अभीष्ट | अभीष्ट |
| ,, | १९ | गृह्नन् | गृह्णन् |
| ३९ | १४ | गृह्नाति | गृह्णाति |
| ४० | ३ | चेष्ठते | चेष्टते |
| ,, | १५ | प्रवशतः | प्रविशतः |
| ४० | १९ | प्रभावः | प्रभावं |

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

| पत्रम् | पङ्क्तिः | अशुद्धम् | शुद्धम् |
|---|---|---|---|
| ४१ | ११ | कथित' | कथिता |
| ४४ | १५ | विचित्रां | विचित्रा |
| ४७ | ४ | न्त्येव | न्त्यव |
| ४८ | ४ | शतिषु | श्रुतिषु |
| ४९ | ८ | कलभि | कलाभि |
| ४९ | १९ | स्वातन्त्र्यय | स्वातन्त्रय' |
| ५० | ४ | चित्ते | चिते |
| ,, | ,, | धृवम् | ध्रुवम् |
| ,, | ५ | निरीक्षते | निरीक्ष्यते |
| ५१ | १३ | जप्यस्थापि | जप्यस्यापि |
| ५१ | १० | अभिपानाय | अभियानाय |
| ,, | ११ | वाचम् | वा |
| ,, | १९ | शस्तैः | शस्त्रैः |
| ५६ | १० | दुःखस्थितं | दुःस्थितम् |
| ६० | १ | पंचमं | प्रथमं |
| ६३ | ६ | मत्री | मन्त्री |
| ,, | १० | प्रस्तुतेऽयि | प्रस्तुतेऽपि |
| ,, | ,, | एवमाशं नं | एवमाशंसनं |
| ६४ | ४ | सभ्रान्त | संभ्रान्त |
| ,, | १६ | प्रविश्यति | प्रविशति |
| ६७ | ५ | मन्त्री | सेनापतिः(प्रविश्य) |
| ६९ | ८ | दत्वा | दत्त्वा |
| ,, | ११ | हश्यन्ते | हन्यन्ते |
| ७० | ९ | वर्धन्तां | वर्धतां |
| ७० | १५ | योधयत | युध्यन्ताम् |
| ७० | १६-१७ | वर्धन्तां वर्धन्तां कालिङ्गा श्रीमदुद्योत देवाः | वर्धन्तां कालिङ्गाः वर्धन्तां श्रीमदुद्द्योतदेवाः |

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

| पत्रम् | पङ्क्तिः | अशुद्धम् | शुद्धम् |
|---|---|---|---|
| ७० | १८-१९ | वर्धन्तां सेनापरि | वर्धतां सेनापरि |
| ७१ | १ | प्रस्तिताः | प्रस्थिताः |
| ,, | ५ | लब्धवती | लब्धवति |
| ,, | ,, | वधन | वर्धन |
| ७२ | ४ | करवल | करवालः |
| ७२ | ७ | त्यत्यी | त्वयि |
| ७३ | ३ | प्रविश्यति | प्रविशति |
| ७३ | ७ | पार्थना | प्रार्थना |
| ,, | १३ | प्रारब्धं | प्रारब्ध |
| ७४ | १७ | नैव | नैवं |
| ७५ | १ | सारज्ञोऽसि भवान् | सारज्ञोऽसि |
| ७७ | १६ | शार्दूलसिंहः | शार्दूलाक्षः |
| ,, | १७ | पर तु | परन्तु |
| ,, | १८ | विनव | विनैव |
| ७८ | ८ | स्वीकृता | स्वीकृता |
| ,, | ,, | ल- | बल |
| ,, | १० | अद्य व | अद्यैव |
| ,, | १५ | युद्धे | युद्ध |
| ७९ | १९ | शापिता | शपिता |
| ८० | ४ | विश्वासनीया | विश्वसनीया |
| ८० | ६ | रात्रावापि | रात्रावपि |
| ८० | १८ | पराजयेता | पराजयेमहि |
| ८३ | ११ | संरभ | संरम्भ |
| ९५ | ३ | पटोत्तलना | पटोत्तोलना |
| ८९ | ५ | मन्दभागिन्या | मद्भगिन्या |
| ,, | १७ | सेचयित्वा | सेकयित्वा |
| | सवत्र | सन्यासी ..... | सन्न्यासी |
| | ,, | उद्योत..... | उद्द्योत |

-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kos

Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan